No 160.

इंद्रजी सूनुना भगवानलालेन लिखितमिदम्

विक्रमवर्षे १९२१

ज्ञातावृत्ति
१

॥र्द०॥ श्रीनमो जिनागमाय॥ ॥नमो अरिहंताणं ॥ नमो सिद्धाणं ॥नमो आयरीआणं॥ नमो उवज्झा
याणं ॥नमो लोइ सव्वसाहूणं॥ इसो पंचनमोक्कारो सव्वपावपणासणो मंगलाणं च सव्वेसिं पढ
मं हवई मंगलं॥१॥ नत्वा श्रीमन्महावीरं प्रायोन्यग्रंथवीक्षितः ज्ञाताधर्म्मकथांगस्यानुयोगः
कश्चिदुच्यते॥ ॥तत्र च फलमंगलादिचर्च्चः स्थानांतरादवसेयः केवलमनुयोगद्वारविशेषस्यो
पक्रमस्य प्रतिभेदरूपं प्रतिभेदस्त्वं प्रक्रांतग्रंथस्य वीरजिनवरेन्द्रापेक्षयार्थतः आत्माग
मत्वं तच्छिष्यं तु पंचमगणधरं सुधर्म्मस्वामिनमाश्रित्यानंतरागमत्वं तच्छिष्यं जंबुस्वामिन
मपेक्ष्य परंपरागमतां प्रतिपादयिषुः ॥अथवानुगमाख्यस्य तृतीयस्यानुयोगद्वारस्य भेदस्तूताया
नुयोद्घातनियुक्तेः प्रतिभेद[illegible] सूत्रनिर्गमद्वारस्तावं प्रस्तुतग्रंथस्यार्थतो महावीरनिर्गतत्व
मभिधित्सुः सूत्रकारः तेणं कालेणमित्यादि सुपोद्घातग्रंथं तावदाह॥ तत्र यो यं णंशब्दः स वा
क्यालंकारार्थो जातः तस्मिन्काले तस्मिन्समये यस्मिन्नसौ नगरी बभूवेति॥ अधिकरणे यं सप्तमी
अथ कालसमययोः कः प्रतिविशेषः॥ ॥उच्यते कालइति सामान्यकालः अवसर्प्पिण्याश्च
तुर्थविभागलक्षणः समयस्तु तद्विशेषो यत्र सा नगरी स राजा सुधर्म्मस्वामी च बभूव॥ अ १

थवा तृतीयैकवचनं यतस्तेन कालेन अवसर्प्पिणी चतुर्थारकलक्षणेन हेतुभूतेन सम
येन तद्विशेषभूतेन हेतुना चंपानामनगरी होत्थेति अभवत् असीदित्यर्थः ननु चेदानी
मपि सास्ति किं पुनरधिकृतग्रंथकरणकाले तत्कथमुक्तमासीदिति उच्यते अवसर्प्पिणि
त्वात्कालस्य वर्णकग्रंथवर्णितविभूतियुक्ता वेदानीं नास्तीति वर्णउ त्ति चंपानगर्याः वर्ण
कग्रंथो त्रावसरे वाच्यः॥ स चायं ~~ऋद्धत्थिमियसमिद्धा...~~ ऋद्धत्थिमियसमिद्धा ऋ
द्धा भवनादिभिर्वृद्धिमुपगता स्तिमिता भयवर्जितत्वात्स्थिरा समृद्धा धनधान्यादिभिर्युक्ता॥ त
तः पदत्रयस्य कर्म्मधारयः पमुइयजणजाणवया प्रमुदिताः प्रमोदकारणवस्तूनां सद्भा
वात् जनाः नगरीवास्तव्यलोका जानपदाश्च जनपदभवास्तत्रायाताः संतो यस्यां सा प्रमु त्त
दितजनजानपदा॥ आइन्नजणमणुस्सा मनुष्यजनेनाकीर्णेति वा मे राजदंतादिदर्शने
नाकीर्णजनमनुष्येत्युक्तं॥ हलसयसहस्ससंकिट्ठ वियट्ठ लट्ठ पणत्त सेतुसीमा॥ हलानां
लांगलानां शतैः सहस्रैश्च शतसहस्रैर्वा लक्षैः संकृष्टा विलिखिता विकृष्टं दूरं यावद्वि
कृष्टा वा आसन्ना लष्टा मनोज्ञा कर्षकाभिमतफलसाधनत्वात् पणत्ति ति योग्याकृ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ज्ञाताद्वृत्ति ताबीजवपनसेसेतुसीमामार्गसीमा यस्याः सा तथा। अथवा संकृष्टादिविशेषणानि सेतू निकु
२ ल्याजलसेक्यक्षेत्राणि सीमासु यस्याः सा तथा अनेन तज्जनपदस्य लोकबाहुल्यं क्षेत्रबाहु
ल्यं चोक्तं। कुक्कुडसंडेयगामपउरा कुक्कुटास्ताम्रचूडाः षांडेयाः षंडपुत्रकाः षंडा एव तेषां
ग्रामाः समूहाः ते प्रचुरा यस्यां सा तथा अनेन लोकप्रमुदितत्वमुक्तं प्रमुदितो लोकः
क्रीडार्थं कुक्कुटान् पोषयति पण्डांश्च करोतीति। उच्छुजवसालिकलिया अनेन जनप्रमो
दकारणमुक्तं न ह्येवंप्रकारवस्त्वभावे प्रमोदो जनपदस्य स्यादिति। गोमहिसगवेलगप्प
भूया गवादयः प्रचुरा यस्यामिति वाक्यं गवेलका उरभ्रा। आयाइन्नचेइयजुवइविसण्णि ६
विट्ठबहुला आकारवंति सुंदराणि यानि चैत्यानि देवायतनानि युवतीनां च तरुणीनां पण्य
तरुणीनामिति उह्यं यानि विविधानि सन्निविष्टानि संनिवेशनानि पाटकास्तानि बहुला
नि यस्यां सा। तथा। उक्कोडियगायगंठिभेयतक्करखंडरक्खरहिया उक्कोटा उक्कोलं लंचेत्य
र्थस्तया ये व्यवहरंति उत्कोटिकाः गात्रात्तु शरीरावयवविशेषात् कट्यादेस्सका
शात् ग्रंथिं कार्षापणपोट्टलिकां भिंदंत्याछिंदंति गात्रग्रंथिभेदास्तस्करश्चौरस्तटाबला। २

स्कारप्रवृत्तयः॥ तस्करास्तदेव चौर्यं कुर्वंतीत्येवंशीलास्तस्कराः खंडरक्षा दंडपाशिकाः
शुल्कपाला वा एतैरहिता या सा तथा॥ अनेन तत्रोपद्रवकारिणामभावमाह॥ खेमा॥
अशिवाभावात्॥ निपद्दुया॥ निरुपद्रुता॥ अविद्यमानराजादिकृतोपद्रवेत्यर्थः॥ सुभिक्खा
स्पष्टमनोज्ञा मधुरा॥ भैक्षकाणं यस्यां सा सुभिक्षा॥ अत एव पाखंडिकानां गृहस्थानां च
वीसत्थसुहावासा॥ विश्वस्तानां निर्भयानां मनुष्याणां सुखः सुखरूपो आवासो यस्यां सा
तथा॥ अणेगकोडीकोडुंबियाइन्नणिव्वुयसुहा अनेककोट्यो द्रव्यसंख्यायां स्वरूपपरि
माणे वा येषां ते अनेककोटयस्तैः कौटुंबिकैः कुटुंबिभिः आकीर्णा संकुला या सा तथा सा
चासौ निर्वृता च संतुष्टजनयोगात् संतोषवतीति कर्मधारयः। ततएव सा चासौ सुखा च सु
खा वेति कर्मधारयः॥ णडणट्टगजल्लमल्लमुट्ठियवेलंबयकहगपवगलासगआइक्खगलंखमंख
तूणइल्लतुंबवीणियअणेगतालायराणुचरिया॥ नटा नटकानां नाटयितारो नर्त्तका
ये नृत्यंति॥ अंकेल्ला इत्येके जल्ला वरत्राखेलका राज्ञः स्तोत्रपाठका इत्यन्ये॥ मल्ला प्रतीताः
मौष्टिका मल्ला एव ये मुष्टिभिः प्रहरंति॥ विडंबकाः विदूषकाः प्लवका ये उत्प्लवंते नद्यादि

कंवातरं ति लासकाये रासकानुगायंति जयशब्दप्रयोक्तारो वा लासका इत्यर्थः आख्याय
काये शुभाशुभमाख्याति लंखा महावंशाग्रखेलकाः मंखाश्चित्रफलकहस्ता भिक्षुकाः
तूणइल्ला तूणत्ति धानिवाद्यविशेषवंतः तुंबवीणावादकाः अनेके च ये तालाचरास्ताला
दानेन प्रक्षारिणस्तैरनुचरिता आसेविता या सा तथा आरामुज्जाणअगडतलायदीहियव
प्पिणगुणोववेया आरमंति येषु माधवीलतागृहादिषु दंपत्यानि ते आरामाः उद्यानानि
पुष्पादिमद्वृक्षसंकुलानि उत्सवादौ बहुजनभोग्यानि अगडत्ति अवटाः कूपास्तडागानि प्र
प्रतीतानि दीर्घिकाः सारण्यः वप्पिणत्ति केदाराः एतेषां ये गुणाः रम्यतादयस्तैरुपपेताः
युक्ता या सा तथा उपपेअ पदस्येतस्य शब्दत्रयस्य स्थाने शकंध्वादिदर्शनात् कारलोपे उपेते ति प
रूपवतीति उव्विद्धविपुलगंभीरखायफलिहा उव्विद्धं उच्चं विपुलं विस्तीर्णं गंभीरं अलब्धम
ध्यं खातं उपरि विस्तीर्णं अधः संकटं परिखा च अधः उपरि समखातरूपा यस्यां सा
तथा चक्कगयमुसुंढिओरोहसयग्घिजमलकवाडघणदुप्पवेसा चक्राणि अरघट्ट
गंत्रिकी चक्राणि गदा प्रहरणविशेषाः मुसुंढयोऽप्येवं अवरोधः प्रतोलिद्वारे ध्वा

न्तरगाकारः संसाध्यते शतघ्न्यो महायष्टयो महाशिला वा याः पातिताः शतानि पुरुषाणां
घ्नंति यमलानि समसंस्थितद्वयरूपाणि यानि कपाटानि घनानि च निश्छिद्राणि तैर्दुःप्रवेशा
या सा तथा धणुकुडिलवंकपागारपरिक्खित्ता धनुःकुटिलं कुटिलधनुः ततोऽपि वक्रे
ण प्राकारेण परिक्षिप्ता या सा तथा कपिशीर्षकैर्वृत्तरचितैर्वर्तुलकृतैः संस्थितैर्विशिष्ट
संस्थानवद्भिः विराजमाना शोभमाना या सा तथा अट्टालयचरियदारगोपुरतोरणउन्न
यविभत्तरायमग्गा अट्टालकाः प्राकारोपरिवर्त्याश्रयविशेषाः चरिका अष्टहस्तप्रमा
णो नगरप्राकारांतरालमार्गः द्वाराणि भवनदेवकुलादीनां गोपुराणि प्राकारद्वाराणि
तोरणानि प्रतीतानि उन्नतानि गुणवंति उच्चानि च यस्यां सा तथा सुविभक्ता विविक्ता रा
जमार्गा यस्यां सा तथा ततः पदद्वयस्य कर्मधारयः छेयायरियरइयदढफलिहइंद
कीला छेकेन निपुणेनाचार्येण शिल्पिना रचितो दृढो परिघो अर्गला इंद्रकीलश्च गोपु
रावयवविशेषो यस्यां सा तथा विवणिवणियछेत्तसिप्पियाइण्णनिव्वुयसुहा विपणीनां वणि
क्पथानां हट्टमार्गाणां वणिजां च वाणिजकानां क्षेत्रं स्थानं या सा तथा शिल्पिभिः कुं

ज्ञाताहृत्तिरसकोशादिसिराकीर्णा स्फुनिर्दिष्टैः स्फुरैवेश्च॥ सुखविसिश्रया राजरेतादिदर्शनात् सा तथा
५ सिंघाडगतिगचउक्कचच्चरपणियावणविविहवत्थुपरिमंडिया॥ शृंगाटकं त्रिकोणं स्थानं
त्रिकं यत्र रथ्यात्रयं मिलति चतुष्कं रथ्याचतुष्कमीलकः॥ चत्वरं बहुरथ्यापातस्थानं
पणितानि भांडानि तत्प्रधाना आपणा हट्टाः विविधवस्तूनि अनेकविधद्रव्याणि एभिः
परिमंडिता या सा तथा सुरम्मा अतिरमणीया॥ णरवइपविइण्णमहिवइपहा नरपतिना
राज्ञा प्रविकीर्णो गमनागमनाभ्यां व्याप्तो महीपतिपथो राजमार्गो यस्यां सा तथा॥ अणे
गवरतुरगमत्तकुंजररहपहकरसीयसंदमाणीआइण्णजाणजुग्गा अनेकैर्वरतुरगैः
मत्तकुंजरैः रहपहकरत्ति रथनिकरैः शिबिकाभिः स्यंदमानीभिराकीर्णा व्याप्ता या
यानैर्युग्यैश्च या सा तथा तत्र शिबिका कूटाकारेणाच्छादिता जंपानविशेषाः स्यंदमा
निकाः पुरुषप्रमाणजंपानविशेषाः यानानि शकटादीनि युग्यानि गोल्लविशेषप्रसि
द्धानि द्विहस्तप्रमाणानि वेदिकोपशोभितानि जंपानान्येवेति॥ विमुउलनलिणिशोभि
यजला विमुकुलानि विकसितकमलानि नलिनीभिः शोभितानि यस्यां सा तथा ५

पंडुरवरभवणसण्णिमहिया॥ पांडुरैः सुधाधवलैः वरभवनैः प्रासादैः सम्यक्निर
रं महितेव महिता पूजिता या सा तथा॥ पंफुउत्ताणनयणपेच्छणिज्जा सोत्तानत्वातिशयादुत्ता
नैरनिमिषैर्नयनैर्लोचनैः प्रेक्षणीया या सा तथा॥ पासाइया चित्तप्रसत्तिकारिणी दरिसणि
ज्जा यां पश्यच्चक्षुः श्रमं न गच्छति॥ अभिरूपा मनोज्ञरूपा॥ पडिरूवा प्रष्टारं द्रष्टारं प्रतिरूपं
यस्याः सा तथेति॥ ८॥ तस्याणमित्यलंकारे॥ चंपानगर्या उत्तरपुरस्थिमेत्ति॥ उत्तरपौरस्त्ये
उत्तरपूर्वायामित्यर्थः॥ दिसिभाए त्ति दिग्भागे पूर्णभद्रं नाम चैत्यं व्यंतरायतनं॥ वण्णउत्ति॥
चैत्यवर्णको वाच्यः॥ स चायं चिराइए पुरिसपण्णत्ते॥ चिरश्चिरकालः आदिर्निवेशो यस्य
तच्चिरादिकं अत एव पूर्वपुरुषैरतीतनरैः प्रज्ञप्तमुपादेयतया प्रकाशितं पूर्वपुरुषप्रज्ञप्तं
पुराणे चिरादिकत्वात्पुरातनं सद्दिए शब्दः प्रसिद्धः स संजातो यस्य तच्छब्दितं॥ वित्तिए वि
त्तं द्रव्यं तदस्ति यस्य तद्वित्तिकं वृत्तिवाश्रितलोकानां ददातीति यत्तद्वृत्तिदं॥ नाए न्याय निर्णाय
कत्वात् न्यायः ज्ञातं वा ज्ञातं सामर्थ्यमनुभूतं प्रासादेन लोकः॥ नेति सच्छत्ते सघंटे सप
डागाइपडागमंडिए सपताकं चायवर्त्त इति पताकं एकां पताकामतिक्रम्य या पताका सा

ता॰ता॰वृत्तिः तिपताकातिपताकामंडितं यत्तथा तच्चतत्तथेतिकर्मधारयः सलोमहच्छे लोमहस्तलोममय
५ प्रमार्जनकयुक्तं कयवेयद्दिए कृतवितर्दिकं रचितवेदिकं लाउल्लोइयमहिए ला
इयं यद्भूमेश्छगणादिनोपलेपनं उल्लोइयं कुड्यमालानां सेटिकादिभिः संमृष्टीकरणं ततस्ता
भ्यां महितमिव महितं पूजितं यत्तत्तथा गोसीससरसरत्तचंदणदद्दरदि
न्नपंचंगुलितले गोशीर्षेण सरसरक्तचंदनेन च दर्दरेण बहलेन चपेटाप्रकारेण वा दत्ताः पंचां
गुलयस्तला हस्तका यत्र तथा उवचियचंदणकलसे उपचिता निवेशिता चंदनकलशा मंग
लघटा यत्र तत्तथेति चंदणघडसुकयतोरणपडिदुवारदेसभाए चंदनघटाश्च सुष्ठु कृ
तानि तोरणानि च द्वारदेशभागं प्रति यस्मिन् तत् चंदनघटसुकृततोरणप्रतिद्वारदे
शभागं देशभागाश्च देशा एव आसत्तोसत्तविपुलवट्टवग्घारियमल्लदामकलावे आसक्तो
भूमौ संबद्धः उत्सक्तश्च उपरि संबद्धः विपुलो विस्तीर्णः वृत्तो वर्त्तुलः वग्घारिउत्ति
प्रलंबमानः माल्यदामकलापः पुष्पमालासमूहः यत्र तत्तथेति पंचवण्णसरससुरभिमुक्कपु
प्फपुंजोवयारकलिए पंचवर्णेन सुरभिणा मुक्तेन क्षिप्तेन पुष्पपुंजलक्षणेनोपचारेण पू ५

जयाकलितं यत्तत्तथा कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघेतगंधुद्धुयाभिरामे
कालागुरुप्रभृतीनां धूपानां यो मघमघायमानो गंध उद्धुत उद्धूतस्तेनाभिरामं यत्तत्तथा
तत्र कुंदुरुक्कं चीडा तुरुक्कं सिल्हकं सुगंधवरगंधगंधिए सद्गंधा ये वरगंधा वासास्तेषां गंधो
यत्रास्ति तत्तथा गंधवट्टिभूए सौरभ्यातिशयाद्गंधद्रव्यगुटिकाकल्पमित्यर्थः नडनट्टक
जल्लमुट्ठियवेलंबकपवककहगलासकआइक्खकलंखमंखतूणइल्लतुंब
वीणियभुयगमागहपरिगए पूर्ववन्नवरं भुजगा भुजंगा भोगिन इत्यर्थः भोजका
वा तद्धर्मका मागधा भट्टाः बहुजणजाणवयस्स विस्सुयकित्तिए बहोर्जनस्य पौरस्य
जानपदस्य च जनपदभवलोकस्य विश्रुतकीर्तिकं प्रतीतख्यातिकं बहुजणस्स आहुस्स
आहुणिज्जे आहोतुर्दातुः आहवनीयं संप्रदानभूतं पाहुणिज्जे प्रकर्षेण आहवनी
यमिति गमनिका अच्चणिज्जे चंदनगंधादिभिः वंदणिज्जे पुष्पैः सक्कारणिज्जे वस्त्रैः सं
माणिज्जे बहुमानविषयतया कल्लाणंमंगलंदेवयंचेइयं विणएणं पज्जुवासणिज्जे कल्ला
णमित्यादिधिया विनयेन पर्युपासनीयं दिव्वे दिव्यं प्रधानं सच्चे सत्यं सत्यादेशत्वात् सच्चो

ज्ञाता टी.
६

वाएसत्या वयातं सत्यसेवंसे सेवायासफलीकरणात् मणिहियपाडिहेरे विहितदेव
तामातिहार्यं जागसहस्सभागपडिच्छए यागाः पूजाविशेषाः आगमप्रसिद्धाः तत्स
हस्राणं भागमेतां प्रतिच्छति आसाद्यत्वात् मत्तस्तथा बहुजणो अच्चेइ आगमपुण्णस्स
दं चेइयं सेणं पुण्णभद्दे चेइए एकेणं महया वणसंडेणं सव्वतो समंता संपरिक्खित्ते सर्व
तः सर्वदिक्समंताद्विदिक्षु वणसंडे किण्हे किण्होभासे कृष्णावभासः कृष्णप्रभः कृष्ण एव आ
वभासत इति कृष्णावभासः नीले नीलोभासे प्रदेशांतरे हरीए हरितप्रदेशान्तरे एव तत्र
नीलो मयूरगलवत् हरितस्तु शुकपिच्छवत् हरितालाभ इति वृद्धाः सीए सीओभासे शीत
स्पर्शापेक्षया वल्यादिक्रांतत्वादिति वृद्धाः निद्धे निद्धोभासे स्निग्धो न तु रुक्षः तिव्वे ति
व्वोभासे तीव्रो वर्णादिगुणप्रकर्षवान् किण्हे किण्हच्छाये इह कृष्णशब्दः कृष्णच्छाय इत्ये
तस्य विशेषणमिति न पुनरुक्तता तथाहि कृष्णः सन् कृष्णच्छायः छाया चादित्यावरण
जन्यो वस्तुविशेषः एवं नीले नीलच्छाये हरीए हरिच्छाये सीते शीतच्छाये निद्धे निद्ध
च्छाए तिव्वे तिव्वच्छाए घणकडियकडिच्छाए अन्योन्यशाखानुप्रवेशात् बहलनि ६

रंतरे महामेहनिकुरंबभूए महामेघवृंदकल्प इत्यर्थः तेणं पायवा मूलमंतो कंदमंतो कं
दो मूलानामुपरि खंधमंतो खंधः स्थुडं तयामंतो सालमंतो शाखाशाखा पवालमंतो
पवालः पल्लवांकुरः पत्तमंतो पुप्फमंतो आणुपुव्विसुजाइरुइलवट्टभावपरिण
या आनुपूर्वेण मूलादिपरिपाट्या सुष्ठु जाता रुचिरा वृत्तभावं च परिणता ये ते तथा एक
खंधी अणेगसाला अणेगसाहप्पसाहविडिमा अनेकानेकशाखा प्रशाखा विटप
स्तन्मध्यभागो वृक्षविस्तारो वा येषां ते तथा अणेगनरवामसुप्पसारियअगेज्झघण
विउलवट्टखंधा अनेकाभिर्नरव्यामाभिः सुप्रसारिताभिः रग्राह्यो घनो निबिडो विपुलो
विस्तीर्णो वृत्तश्च स्कंधो येषां ते तथा अच्छिद्दपत्ता निरंध्रपत्रा अविरलपर्णा निरंतरद
ला अवाईणपत्ता अर्वाचीनपत्रा अधोमुखपलाशाः अनातीनपत्रा वा अनातोप
हतवर्हा अणईइपत्ताई इति विरहितच्छदाः निद्धूयजरढपंडुपत्ता अपगतपुराणपां
डुरपत्राः नवहरियभिसंतपत्तभारंधकारगंभीरदरिसणिज्जा नवेन हरितेन भिसंतत्ति
दीप्यमानेन पत्रभारेण दलसंचयेनांधकारवंतो वर्णतो गंभीराश्च दृश्यंते ये ते तथा उवणि ७

गय णच्चतरुण पत्त पल्लव कोमल उज्जल चलंत किसलय सुकुमाल पवाल सोहिय वरंकुर
ग्गसिहरा उपनिर्गतैर्नवतरुणपत्रपल्लवैरत्यसिनवगुच्छैः तथा कोमलोज्ज्वलैश्चलद्भिः
किशलयैः पत्रविशेषैः तथा सुकुमालप्रवालैः शोभितानि वरांकुराण्यग्रशिखराणि येषां ते
तथा च इह चांकुरकिशलयप्रवालाणं अल्पबहुकालकृतावस्थाविशेषाः संभाव्यंत
इति निच्चं कुसुमिया निच्चं माइया मउलिताः णिच्चं पलवईया नित्यं पल्लविताः णिच्चं थव
इया नित्यं स्तबकवंतः निच्चं गुलुईया नित्यं गुल्मवंतः णिच्चं गोच्छिया जातगुच्छा यद्यपि
स्तबकगुच्छयोरविशेषो कोशे धीतस्तथापीह विशेषो भावनीयः णिच्चं मलियाय मलत
या समश्रेणितया व्यवस्थिताः निच्चं जुयलिया युगलतया स्थिताः णिच्चं विणमिया विशेषे
ण फलपुष्पभारेण नमिताः णिच्चं पणमिया तथैव नंतुमारब्धाः निच्चं कुसुमिय माइय
लवईय थवइय गुलुईय गोच्छिय जमलिय जुयलिय विणमिय सुविहत्तपिडिमंजरि
वडिंसगधरा केचित्कुसुमिताद्येकैकगुणयुक्ता अपरे तु समस्तगुणयुक्ता स्ततः कुसुमि
ताश्चेत्येवं कर्मधारयः नवरं सुविरत्का विविक्ताः सुनिष्पन्नतया पिंड्यलुंब्यः ७

मंजर्यश्च प्रतीतास्ता एवावतंसकाः शेखरकास्तान्धारयंतीत्येते तथा सुयबरहिणमयणसाल
कोलगकलिंतगारककोंडलकजीवंजीवकनंदीमुहकविलपिंगलरकगकारंडचक्कवायक
लहंससारसअणेगसउणगणमिहुणविचरीयसद्दुन्नइयमहुरसरणाइए सुकादीनां सारसा
न्तानां मनेकेषां शकुनगणानां मिथुनैर्विरचितं शब्दोन्नतिकं चोन्नतशब्दकं मधुरस्वरं कै च
नादितं यस्मिन्स तथा वनखंड इति प्रक्रमः सुरंमे संपिंडियदरियभमरमहुकरिपह
कर परिलिंतमत्तछप्पयकुसुमासवलोलमहुरगुमगुमेंतगुंजंतदेसभागे संपिंडिता
दृप्ता भ्रमरमधुकरीणां वनस्थानामेव पहकरा निकायाः यत्र स तथा तथा परिलीयमा
ना अन्यतः आगत्य परिलीयमानो मत्तषट्पदाः कुसुमासवलोलाः किंजल्कलंपटा म
धुरं गुमगुमायमानाः गुंजंतश्च शब्दविशेषं विदधानाः देशभागा यस्य सः तथा ततः क
र्मधारयः अब्भंतरपुप्फफला बाहिरं पत्तुच्छण्णा पत्तेहिं य पुप्फेहिं य उच्छन्नपलिच्छन्ना अ
त्यंतमाच्छादिता इत्यर्थः एतानि पुनर्वृक्षाणां विशेषणानि साउफले मिट्ठफले इत्य
तो वनखंडस्य स्तयो विशेषणे स्यै निरोयए रोगवर्जितः णाणाविहगुच्छगुंममंडवगसोहिए

ज्ञाताधू॰ विचित्रसुमहकेउसए विचित्रानेकधुसानकेतूनुध्वजान् स्तनः प्रासः वा विपुष्करिणिदी
९ हियासुय निवेसियरम्मजालहरए वापीषुचतुरस्रासुपुष्करिणीषु हत्तासुपुष्करवती
षुवा दीर्घिकासुच वीकजसाराणीसुच निवेशितानि रम्याणि जालगृहकाणि यत्र स
तथा पिंमिमनीहारिमसुगंधिसुहसुरसिमणहरं च महयागंधद्धणिं मुयंता पिंडिमनि
र्हारिमां पुग्गलसमूहरूपां दूरदेशगामिनीं च सुगंधिकां शुभसुरभिसोगंधान्तरेभ्यः स
काशान्मनोहरायासात थातांच महता मोचनप्रकारेण विसच्छि व्यस्यया न्मइ ती चागं
धएव घ्राणिहेतुत्वात्तत्तिकारित्वाद्धूम घ्राणिस्तां मुचतः इति वृक्षविशेषणमेवमितोन्या
न्यपि नाणाविहगच्छगुंम मंडवकपरकसुहसेउकेतव ध्वजा बहुला बहवो येषां ते त
था ततः कर्मधारयः अणेगरहजाणजुग शिबियपविमोयणाः अनेक षोरध्यादीनां म
धोतिविस्तीर्णत्वात्प्रविमोचनं येषु ते तथा सुरंमायासा इयादरिसणिज्जा अभिरूवा प
डिरूवा तस्सणं वणसंडस्स बहुमझदेससाए एत्थणं महं एक्के असोगचरपायवे पन्नत्ते कु
सविकुसविसुद्धरुक्खमूले कुशाद र्ता विकुशा वल्कजादयस्तैर्विशुद्धं विरहितं वृक्षानु ९

पं मूलं समीपं यस्य स तथा मूलमंते इत्यादि विशेषणानि पूर्ववद्व्याख्यानि यावत्पडिरूवे से
ण असोगवरपायवे अन्नेहिं बहूहिं तिलगएहिं । लउओ एहिं सिरीसेहिं सत्तवणेहिं
दहिवन्नेहिं लोद्धेहिं धवेहिं चंदणेहिं अज्जुणेहिं णिंबेहिं कलंबेहिं सव्वेहिं फणसेहिं सालेहिं
तमालेहिं पियएहिं पियंगूहिं पुरोवएहिं रायरुक्खेहिं नंदिरुक्खेहिं सव्वतो समंता
संपरिक्खित्ते ते णं तिलया लउया जाव णं दिरुक्खा कुसविकुसविसुद्धरुक्खमूला मूलमंतो
इत्यादि पूर्ववत् ॥ यावत्पडिरूवा तेणं तिलया जाव णंदिरुक्का अन्नाहिं बहूहिं पउमलया
हिं णागलयाहिं असोगलयाहिं चूयलयाहिं वणलयाहिं वासंतिअमलयाहिं ॥ कुंदलया
हिं सामलयाहिं सव्वउ समंता परिक्खित्ता ताणं पउमलयाउ णिच्चं कुसुमि याओ जाव पडिरूवा
अ ॥ ७ ॥ तस्स णं असोगवरपायवस्स हेट्ठा ईसिखंधि समल्लीणे खंधासन्नमित्यर्थः ॥
एत्थ णं महं एक्के पुढविसिलापट्टए २ पण्णत्ते ॥ एत्थणं तिशब्दो णोक्तवरपादपस्य यदधो
त्येवं संबंधनीयः ॥ विक्खंभायामुस्सेहसुप्पमाणे किण्हो अंजणकवाणकुवलय
हलहरकोसेयआगासकेसकज्जलगिखंजणसंगेयरिट्ठयजंबूफल असणकस

ज्ञाताटी०
९

णबंधणनीलुप्पलनिकर अयसिकुसुमप्पयासे नीलइत्यर्थः अंजनको वनस्पतिः हरकोरं
यबलदेववस्त्रं कच्छलंगी कच्छलगृह शृंगभेदः महिषादिविषाणभेदः रिष्टकरत्नं असन
नको बायकाशिधानो वनस्पतिः सनबंधनं सनपुष्पवृंतं मरकतमसारकलितं णयणधिय
वासिवर्णे मरकतं रत्नमसारो मसृणीकारकः पाषाणविशेषः कलितंति कलित्रं कृति
विशेषः नयनधीका नेत्रमध्यतारा नक्षासीवर्णः कालः कालइत्यर्थः णिद्धघण स्निग्धघ
नः अट्ठसिरेअ अष्टसिराः अष्टकोण इत्यर्थः अयसतलोवमे सुरमे ईहामियउसभतुरगनर
मकरवालककिंणररुरुसरभचमरवणलयपउमलयभत्तिचित्ते ईहामृगाः वृकाः व्यालकाः
श्वापदभुजगाः आइणगरूयपूरणवणीयतूलफासे आजिनकं चर्ममयवस्त्रं रूतं प्रतीतं बू
रो वनस्पतिविशेषः तूलमर्कतूलं सिंहासणसंठिए आसाएजाव पडिरूवेत्ति ० इह ग्रंथे वा
चनाद्वयमस्ति यद्वैकां बृहत्तरां व्याख्यास्यामो द्वितीयां तु प्रायः सुगमैव यच्च तत्र दुरवगमं
तद्धितरव्याख्यानतो वबोधव्यमिति ० कूणिएनामराएयत्ति कूणिकनामा श्रेणिकपुत्रो रा
जा इत्यर्थः वन्नउत्ति तद्वर्णकोवाच्यः स च महयाहिमवंतमलयमंदरमहिंदसा
रे इत्यादि पसंतडिंबडमरं रज्जं पसासेमाणे विहरइ इत्येतदंतः ॥ तत्र च महयाहिमवानिव महा

महाहिमवानिव महान् शेषराजापेक्षया ॥ मलयः पर्वतविशेषो मंदरो मेरुर्महेन्द्रः शक्रो देवरा
जस्तद्वत्सारः प्रधानो यः स तथा प्रशांतानि डिंबानि विघ्नाः डमराणि राजकुमारकृतविड्व
रायस्मिंस्तत्तथा प्रसाधयन् पालयन् विहरति आस्ते ॥ तस्सेति तस्य णं पुनरग्रे आख्यास्यामः
स्थेरेति कृतादिसिद्धत्वात् स्थविरः ॥ तथा जातिसंपन्नः इति उत्तममातृकपक्षयुक्त इति प्रतीय
मन्यथा मातृकपक्षसंपन्नत्वं पुरुषमात्रस्य स्यादिति नास्योत्कर्षः कश्चिदुक्तो भवेदुत्कर्षाभिधा
नार्थं चास्य विशेषणकलापोपादानं चिकीर्षितमिति ॥ एवं कुलसंपन्नोपि नवरं कुलं पैतृक
पक्षः तथा बलं संहननविशेषसमुत्थप्राणः रूपमनुत्तरसुरूपादनंतगुणं शरीरसौन्दर्यं
विनयाशिनि ॥ प्रतीतानि नवरं लाघवं द्रव्यतो ऽल्पोपाधित्वं भावतो गौरवत्रयत्यागः ॥ एतैः
संपन्नो यः ॥ तथ ओयंसित्ति ओजो मानसोऽवष्टंभस्तद्वानोजस्वी तेजः शरीरप्रभा तद्वांस्ते
जस्वी ॥ वच्चवचनं सौभाग्याद्युपेतं यस्यास्ति स वचस्वी ॥ अथ वा वर्चस्तेजः प्रभाव इत्य
र्थस्तथा वर्चस्वी यशस्वी ख्यातिमान् इह च विशेषणचतुष्टयेपि अनुस्वारः प्राकृतत्वात् ॥
जितक्रोध इत्यादि तु विशेषणसप्तकं प्रतीतं नवरं क्रोधादिजय उदयप्राप्तक्रोधादिविफ

ज्ञातावृत्तिः
१०

लीकरणलोत्रसेयः तथा जीवितस्य प्राणधारणस्याशाकांक्षा मरणस्य च यद्भयं ताभ्यां विप्रमुक्तः
तदुभयोपेक्षक इत्यर्थः तथा तपसा प्रधान[illegible]ःउत्तमः शेषमुनिजनापेक्षया तपो वा प्रधा
नं यस्य स तपप्रधानः एवं गुणप्रधानोपि नवरं गुणाः एतेन विशेषणद्वयेन तपःसंयमौ पूर्वबद्धाभि
नवयो कर्मणो निर्जरणानुपादानहेतु मोक्षसाधने मुमुक्षूणामुपादेयावुपदर्शितौ गुणप्रधा
न्यप्रपंचार्थमेवाह एवंकरणेत्यादि यथा गुणशब्देन प्रधानशब्दोत्तरपदेन तस्य विशेषणमुक्त
मेवं करणादिभिरेकविंशतिविशेषणान्यध्येयानि तद्यथा करणप्रधान ~~नि[illegible]निर्ण~~
~~यः निश्चितानुष्ठानेषु~~ श्चरणप्रधानो यावच्चरित्रप्रधानः तत्र करणं पिंडविशुद्ध्यादि यदाह
पिंडविसोही समिई भावणेत्यादि चरणं महाव्रतादि आह च वयसमणधंम्मसंजमवेयावच्चे
त्यादि निग्रहो नाचारप्रवृत्तेर्निषेधनं निश्चयस्तत्त्वानां निर्णयः विहितानुष्ठानेषु वावश्यंकरणाभ्यु
पगमः आर्जवं मायानिग्रहो मार्दवं माननिग्रहो लाघवं क्रियासु दक्षत्वं क्षांतिः क्रोधनिग्रहः गु
प्तिः मनोगुप्त्यादिका मुक्तिर्निर्लोभता विद्याः प्रज्ञप्त्यादिदेवताधिष्ठिता वर्णानुपूर्व्यः मंत्राः
हरिणेगमेष्यादिदेवताधिष्ठिता वा अथवा विद्याः ससाधना नैगमादयः ससप्रनाः साध
कु नरहिता मंत्राः ब्रह्मचर्यं सर्वमेव कुशलानुष्ठानं वेद आगमो लौकिकलोकोत्तरकुप्रा १०

वचनिकभेदः नया नैगमादयः सप्त प्रत्येकं शतविधाः नियमाः विचित्रा अभिग्रहविशेषाः
सत्यं वचनविशेषः शौचं द्रव्यतो निर्लेपता भावतोनवद्यसमाचारता ज्ञानं मत्यादि दर्शनं
चक्षुःदर्शनादि सम्यक्त्वं वा चारित्रं बाह्यसदनुष्ठानं यच्चेह करणचरणग्रहणेपि आर्जवादि
ग्रहणं तदार्जवादीनां प्राधान्यख्यापनार्थं ननु जितक्रोधादीनां आर्जवादीनां को विशेषः उच्य त्या
ते जितक्रोधादिविशेषणेषु तदुदयविफलीकरणमुक्तं मार्दवप्रधानादिषु तूदयनिरोधः
अथवा यतएवासौ जितक्रोधादिरत एव क्षमादिप्रधानः इत्येवं हेतुहेतुमद्भावाद्वि
शेषः तथा ज्ञानसंपन्न इत्यादौ ज्ञानादिमत्त्वमात्रमुक्तं ज्ञानप्रधान इत्यादौ तु तेषां मध्ये
तस्य प्राधान्यमित्येवमन्यान्यपि पौनरुक्त्यं भावनीयं तथा उराले त्ति भीमो भयानकः क
थं अतिकष्टं तपः कुर्वन् पार्श्ववर्त्तिनामल्पसत्त्वानां सत्त्वानां भयानको भवति अपर
स्त्वाह उराले त्ति उदारः प्रधानः घोरे त्ति घोरो निर्घृणः परीसहेन्द्रियकषायाख्यानां रि
पूणां विनाशकर्त्तव्ये अन्ये त्वात्मनिरपेक्षं घोरमाहुः तथा घोरव्वए त्ति घोराणि अन्यैर्दुर
चराणि व्रतानि महाव्रतानि यस्य स तथा घोरैस्तपोभिः तपस्वी घोरं च तद्ब्रह्मचर्यं च

न्यस्तत्वेदुःखं यथा दृश्यते । तस्मिन् घोरब्रह्मचर्ये वस्तुं शीलमस्येति घोरब्रह्मचर्यवासी
तथा उच्छूढत्ति उत्क्षिप्तमिवोक्षिप्तं शरीरं येन तत्संस्कारं प्रति निस्पृहत्वात् स तथा । तथा संक्षि
प्ता शरीरान्तरनिलीना विपुला अनेकयोजनप्रमाणक्षेत्राश्रितवस्तुदहनसमर्था ते
जोलेश्या विशिष्टतपोजन्यलब्धिविशेषप्रभवा तेजोज्वाला यस्य स संक्षिप्तविपुलतेजोले
श्यः । तथा चतुर्दशपूर्वीति व्यक्तं तेन तस्य च विशेषोऽभिहितः पंचभिरनगारशतैः साधुशतैः सा
र्द्धं सह संपरिवृतः समंतात् परिकरित इत्यर्थः । तथा पुव्वाणुपुव्विंति पूर्वानुपूर्व्या न पश्चा
नुपूर्व्या इत्यर्थः । चरमाणेति क्रमेण संचरन् । एतदेवाह गामाणुगामं दूइज्जमाणेत्ति ग्रामश्चानु
ग्रामश्च विवक्षितग्रामानंतरग्रामो ग्रामानुग्रामं तद् द्रवन् गच्छन् एकस्माद्ग्रामादनं
तरं ग्राममनुल्लंघयन्नित्यर्थः । अनेनाप्रतिबद्धविहारमाह । तत्राप्यौत्सुक्याभावमाह । तथा
सुहंसुहेणं विहरमाणेत्ति अत एव सुखसुखेन शरीरखेदाभावेन संयमबाधाभावेन विहर
न् स्थानात् स्थानान्तरं गच्छन् ग्रामादिषु वा तिष्ठन् जेणेवेत्ति यस्मिन्नेव देशे चंपा नगरी यस्मि
न्नेव प्रदेशे पूर्णभद्रं नाम चैत्यं तेणामेवेति तस्मिन्नेव देशे उपगच्छति । क्वचिद्राजगृहे गुण ११

शीलके इति दृश्यते स चापपाठ इति मन्यते । उपागत्य च यथाप्रतिरूपं यथोचितं मुनिजनस्य अ
वग्रहमनुज्ञापनापूर्वकं गृहीत्वा संयमेन तपसा चात्मानं भावयन् विहरति आस्ते स्म । तए
णंति ततोऽनंतरं णमिति वाक्यालंकारे चंपानगर्याः परिषल्लोको कोणिकराजादिलोको निर्गता
निःसृता कथं धर्मस्वामिवंदनार्थं जामेव दिसं पाउब्भूया तामेव दिसं पडिगयत्ति । यस्याः दिशः
सकाशात् प्रादुर्भूता आगता इत्यर्थः । तामेव दिशं प्रतिगता इ... ति । तस्मिन् काले त
स्मिन् समये आर्यसुधर्मस्वामिनोऽन्तेवासी आर्यजंबूनामानगारः काश्यपगोत्रेण सत्तुस्सेहेति
सप्तहस्तोच्छ्रयो यावत्करणादिदं दृश्यं । समचउरंससंठाणसंठिए वज्जरिसहनारायसंघय
णे कणगपुलगनिघसपम्हगोरे कनकस्य सुवर्णस्य पुलगत्ति यः पुलको लवस्तस्य
य यो निकषः कषपट्टे रेखालक्षणस्तथा पम्हत्ति पद्मगर्भस्तद्वद् गौरो यः स तथा वृद्धव्या
ख्यातु कनकस्य न लोहादेः पुलकः सारो वर्णातिशयः तत्प्रधानो यो निकषो रेखा तस्य
यत्पक्ष्म बहुलत्वं तद्वद्यो गौरः स कनकनिकषपक्ष्मगौरः । तथा । उग्रतपाः उग्रम
प्रधृष्यं तपो यस्येति कृत्वा तथा । तत्ततवे । तप्तं तापितं तपो येन स तप्ततपाः एवं तेन

ज्ञा० वृ० तत्तपस्तत्संयेन कर्म्मणि संताप्यंते तेन तपसा स्वात्मा पि तपो रूपः संतापितो [illegible] यतोन्य
१२ स्यास्पृश्यमिव जातमिव तथा महातपाः प्रशस्ततपा बृहत्तपा वा तथा दिप्तं तपो यस्य सः दि
प्ततपः॥ दिप्तं तु हुताशन इव ज्वलत्तेजः कर्म्मवनदाहकत्वात् तथा उराले॥ घोरे॥ घोरगुणे॥
घोरतवस्सी घोरबंभचेरवासी उछूढसरीरे संखित्तविउलतेयलेस्से॥ इति पूर्ववत्
एवंगुणविसिष्टो जंबूस्वामी भगवान् आर्यस्य धर्म्मणः स्थविरस्य अदूरसामंते त्ति॥
दूरं विप्रकर्षः॥ सामंतं समीपं तन्निषेधात् अदूरसामंतं नातिदूरे नातिसमीपे उचिते
देशे स्थित इत्यर्थः॥ कथं उड्ढंजाणू इत्यादि॥ शुद्धपृथिव्यासनवर्जनात् औपग्रहिकनिषद्या
याभावाच्च उत्कुटुकासनः सन्नुपदिश्यते॥ ऊर्ध्वजानुनी यस्य स उर्द्धजानुः॥ अधः शिराः अधो
मुखो नोर्द्धं तिर्यग्वा विक्षिप्तदृष्टिः॥ किंतु नियतभूभागनियमितदृष्टिरिति भाव
ना॥ झाणकोट्ठोवगए त्ति॥ ध्यानमेव कोष्ठः ध्यानकोष्ठस्तमुपागतो ध्यानकोष्ठोपगतः॥
यथाहि कोष्ठे निक्षिप्तं धान्यं न विप्रकीर्णं भवत्येवं स भगवान् धर्म्मध्यानकोष्ठकम
नुप्रविश्येंद्रियमनांस्यधिकृत्य संवृतात्मा भवतीति भावः॥ संयमेन संवरेण तपसा ध्या १२

नेनात्मानं भावयन् वासयन् विहरति तिष्ठति तएणं से इत्यादि ततः इत्यानंतर्ये तस्माद्ध्या
नानंतरं णमित्यलंकारे से इति पूर्वप्रस्तुतपरामर्शार्थः तस्य कस्मा मान्यो कस्य विशेषाव
धारणार्थं आर्यजंबुनामेति सच उत्तिष्ठतीति संबंधः किंभूतः सन्नित्याह जायसड्ढे इ
त्यादि तत्र [illegible] सर्वे जाता प्रवृत्ता श्रद्धा यस्येति जातश्रद्धः वक्ष्यमाणानां पदार्थानां त
त्वपरिज्ञानेन तथा जातः संशयो यस्येति जातसंशयः संशयस्त्वनिर्द्धारितज्ञानमुभयव
स्तुंशावलंबितया प्रवृत्तं स त्वेवं तस्य भगवतो जातः यथा भगवता श्रीमन्महावीरवर्द्ध
मानस्वामिना त्रिभुवनप्रकाशप्रदीपकल्पेन पंचमस्यांगस्य समस्तवस्तुस्तोमव्यतिकरवि
तानवेनार्थोभिहितः एवं षष्ठस्याप्युक्तोन्यथा वेति तथा जातकुतूहलो जातं कुतूहलं यस्य
स तथा जातौत्सुक्य इत्यर्थः विश्वस्यापि विश्वस्यापि विश्वव्यतिकरस्य पंचमांगे प्र
तिपादितत्वात् षष्ठांगस्य कोन्योर्थो भवता भिहितो भविष्यतीति संजातश्रद्ध इत्यादौ समु
त्पन्नश्रद्ध इत्यादौ च सं शब्दः प्रकर्षादिवचनः तथा उत्पन्नश्रद्धः प्रागभूता उत्पन्ना श्र
द्धा यस्येति उत्पन्नश्रद्धः अथोत्पन्नश्रद्धस्य च को अर्थभेदो न कश्चिदपि किमर्थं तत्र

ज्ञातावृत्ति योगः॥ हेतुत्वप्रदर्शनार्थं॥ तथाहि उत्पन्नश्रद्धत्वाज्जातश्रद्धः प्रवृत्तश्रद्ध इत्यर्थः॥ अपरस्त्वाह
२३ जाता श्रद्धा यस्य प्रष्टुं स जातश्रद्धः॥ कथं जातश्रद्धो यस्माज्जातसंशयः॥ षष्ठांगार्थः स्वं समांगार्थ
वत्स्मृतः ततः उतान्ययेति कथं संशयो जनि॥ यस्मात्स्मात्कुतूहलं कीदृशो नाम षष्ठांगस्यार्थोऽस्ति वि
त ष्यति॥ कथं चैमं मया ज्ञास्यते इति यावदेव यइ॥ एवं संजातोत्पन्नसमुत्पन्नश्रद्धादयः॥ इहापा
यधारणभेदेन ना च्या इति॥ उट्ठाए उट्ठेइ त्ति॥ उत्थानमुत्था ऊर्ध्ववर्त्तनं तया उत्थयोत्तिष्ठति
उत्थाय जेणेति प्रकटं॥ अज्जसुहम्मे थेरे इत्यत्र षष्ठ्यार्थे सप्तमीति॥ तिक्खुत्तो त्ति॥ त्रिःकृत्वा
त्रीन्वारान्॥ आदाहिणपयाहिणं दक्षिणहस्तादारभ्य परिभ्रमणतो दक्षिणपार्श्वप्रा
प्तिरादक्षिणप्रदक्षिणा तां अज्जसुहम्मं थेरं॥ इत्यत्र तु पाठान्तरे आदक्षिणात्प्रदक्षिण
पार्श्व[illegible] वर्त्तीयः स तथा स तथा नं करोति विदधाति॥ वंदते वाग्भिः स्तौति नमस्यति कायेन
प्रणमति॥ नत्वा सन्ने नातिदूरे उचिते देशे इत्यर्थः॥ सुस्सूसमाणे त्ति श्रोतुमिच्छन् नमंस
माणे त्ति नमस्यन् प्रणमन्॥ अभिमुहे अभिमुखः॥ पंजलियडे त्ति कृतप्रांजलिः॥ विनयेन उक्त
लक्षणेन पज्जुवासमाणे त्ति॥ पर्युपासनां विदधानः॥ एवमिति वक्ष्यमाणप्रकारं वदा २३

सि त्ति अवादीत् यदवादीत्तदाह जे इत्यादि प्रकटं नवरं यदि श्रमणेन पंचमांगस्यानं
तरोदितत्वेन प्रत्यक्षः प्रक्रान्तः षष्ठांगस्य कोऽर्थः प्रज्ञप्त इति प्रश्नवाक्यार्थ अथोत्त
रदानार्थं जंबुत्ति हे जंबु इत्येवं प्रकारेणामंत्रणवचसामंत्र्य आर्यसुधर्म्मस्थविरः आर्य
जंबूनामानमनगारमेवमवादीत् नायाणि त्ति ज्ञातान्युदाहरणानीति प्रथमश्रुतस्कं
धः धम्मकहाउ त्ति धर्म्मप्रधानाः कथा धर्म्मकथा इति द्वितीयः उक्खित्तेत्यादि श्लोकद्व
ये सार्द्धे तत्र मेघकुमारजीवेन हस्तिभवे वर्त्तमानेन यः पाद उत्क्षिप्तः स्तेनोत्क्षिप्तेनोप
लक्षितं मेघकुमारचरितमुत्क्षिप्तमेवोच्यते उक्षिप्तमेव ज्ञातमुदाहरणं विवक्षितार्थ
ता साधनमुत्क्षिप्तज्ञातं ज्ञातावस्येवं भावनीयाः संघाटादिगुणवंतः सङ्गत एव देशकत्वं उक्षिप्ते
कपादो मेघकुमारजीवहस्तिनेति एतदर्थाभिधायकं सूत्रमधीयमानत्वात् अध्यय
नमुक्तमेवं सर्वत्र तथा संघाटकः श्रेष्ठिचौरयोरेकबंधनबद्धत्वमिदमप्यभीष्टार्थज्ञा
पकत्वात् ज्ञातमेवमौचित्येन सर्वत्र ज्ञातशब्दो योज्यः यथाकथं च ज्ञातत्वं प्रत्यध्यय
नं तदर्थावगमाद्यसेयमिति २ नवरं अंडकं मयूरांडं ३ कूर्म्मश्च कच्छपः धन्नासको

ज्ञातावृत्तिः ॥१५॥

राजर्षि ॥ ५ तुंबं अलाबूः ॥ ६ रोहिणिश्रेष्ठिवधूः ॥ ७ मल्ली एकोनविंशतितमजिनस्थानोत्पन्ना तीर्थकरी ॥ ८ माकंदिनामा वणिक् तत्सुत्रो माकंदिज्ञात इति नगरीतो ॥ ९ चंद्रमा इति च १० दावद्दवे त्ति समुद्रतटवृक्षविशेषाः ॥ ११ उदकं नगरपरिखाजलं तदेव ज्ञातमुदाहरणं उदकज्ञातं ॥ १२ मंडूकः नंदमणिकारश्रेष्ठिजीवः ॥ १३ तेयली इति तेतलिसुताभिधानो मात्यः इति १४ नंदिफल त्ति नंदिवृक्षाभिधानतरुफलानि ॥ १५ अवरकंका धातकीखंडभरतक्षेत्र राजधानी ॥ १६ आइण्णे त्ति आकीर्णजात्याः समुद्रमध्यवर्तिनोऽश्वाः ॥ १७ सुंसुमा इय त्ति सुंसुमाभिधाना श्रेष्ठिदुहिता ॥ १८ अपरं च पुंडरीकज्ञातमेकोनविंशतितममिति ॥ १९ यदि प्रथमश्रुतस्कंधस्यैतान्यध्ययनानि भगवता तानि ततः प्रथमाध्ययनस्य कोऽर्थो भगवता प्रज्ञप्त इति शास्त्रार्थप्रस्तावना ॥ अथ एवं पृष्टवंतं जंबूस्वामिनं प्रति सुधर्मस्वामी यथाश्रुतमर्थं वक्तुकामस्तस्येति एवमित्यादिसूत्रं ॥ नवरं एवं खलु इति वक्ष्यमाणप्रकारोऽर्थः प्रज्ञप्त इति प्रक्रमः ॥ खलु वाक्यालंकारे जंबु इति शिष्यामंत्रणे ॥ इहेव त्ति देशतः प्रत्यक्षासन्ने न पुनर्जंबूद्वीपानामन्यत्रेत्ति भावः ॥ भारहे वासे क्षेत्रे दाहिणड्ढभर ॥१५॥

हेत्ति दक्षिणार्द्धभरते नोत्तरार्द्धभरते दूर्वीति राजसार्या वण्णउ त्ति वर्णको वाच्यः स च वक्ष्यमाणधारिण्या इव द्रष्टव्यः अहीण त्ति अहीनः अंगजइत्यर्थः अहीणजावसुरूवे त्ति इह यावत्करणादिदं द्रष्टव्यं अहीणपंचेंदियसरीरे अहीनान्यन्यूनानि लक्षणतः स्वरूपतो वा पंचापींद्रियाणि यस्मिं स्तत्तथाविधं शरीरं यस्य सः तथा लक्खणवंजणगुणोववेए लक्षणानि स्वस्तिकचक्रादीनि व्यंजनानि मषतिलकादीनि तेषां यो गुणः प्रशस्तता तेनोपपेतो युक्तो यः स तथा उपअपदितिशब्दत्रयस्य स्थाने शकंध्वादित्वादर्शनादुपपेत इति स्यात् माणुम्माणपमाणपडिपुन्नसुजायसव्वंगसुंदरंगे तत्र मानं जलद्रोणप्रमाणता कथं जलस्येति जलेनातिभृते कुंडे पुरुषे निवेशिते यज्जलं निस्सरति तद्यदि द्रोणमानं स्यात्तदा पुरुषो मानप्राप्त उच्यते तथा उन्मानं अर्द्धभारप्रमाणता कथं तुलारोपितः पुरुषो यद्यर्द्धभारं तुलति तदा स उन्मानप्राप्त इत्युच्यते प्रमाणं स्वांगुलेनाष्टोत्तरशतोच्छ्रयता ततश्च मानोन्मानप्रमाणैः प्रतिपूर्णान्यन्यूनानि सुजातानि सुजनिष्पन्नानि सर्वाण्यंगानि शिरःप्रभृतीनि यस्मिन् तत्तथाविधं सुंदरमंगं शरीरं यस्य स तथा

ज्ञाताद्वृत्तिः १५

स तथा॥ससिसोमाकारं कंतं पियदंसणे॥ शशिवत्सौम्याकारं कांतं कमनीयं प्रियं प्रे
क्षकाणां दर्शनं रूपं यस्येति स तथा॥ अत एव सुरूपेति सुरूप इति॥ तथा सामभेददंड॥
भेद उपप्रदानलक्षणा राजनीतयः तासां सुष्ठु प्रयुक्तं प्रयोगो व्यापारणं यस्य स त
था॥ तथा नयानां नैगमादीनां उक्तलक्षणनीतीनां वा या च द्विधा विधयः प्रकारास्तान् जा
नातीति यः स तथा पश्चात्पदद्वयस्य कर्मधारयः॥ तत्र परस्परोपकारदर्शनात् गुणकीर्त्त क
नादिना मित्रीकरणं साम तथा वधपरिक्लेशधनहरणादिको दंडः॥ विजिगी
षोः शत्रुपरिवारस्य स्वाम्यादिस्नेहापनयनादिको भेदः॥ गृहीतधनप्रदानादिकमु
पप्रदानं॥ नयविधयस्तु सप्त नैगमादयो नयाः प्रत्येकं शतभेदाः॥ नीतिभेदास्त्वामनी
ताः पंचादिमस्य त्रयः स्ते दस्य उपप्रदानस्य च पंच पंच॥ कामंदकादिप्रसिद्धा इति॥
॥ तथा ईहा च स्थाणुरयं पुरुषो वेत्येवं सदर्थालोचनाभिमुखा मतिचेष्टा अपोहश्च
स्थाणुरेवायमित्यादिरूपो निश्चयः॥ मार्गणं च इह वल्ल्युत्सर्पणादयः स्थाणुध
र्मा एव प्रायो घटंते इत्यादि अन्वयधर्मालोचनरूपं गवेषणं च इह शिरःकंडूयनादयः १५

पुरुषधर्मा प्रायो न घटंत इति व्यतिरेकरूपं धर्मालोचनरूपं॥ इहा व्यूहमार्गणगवेषणानि तै २
रर्थशास्त्रे ऽर्थोपायव्युत्पादनग्रंथे टिल्लराजनीत्यादौ या मतिर्बोधस्तया विशारदः पंडितो
यः स ईहाव्यूहमार्गणगवेषणार्थशास्त्रमतिविशारदः तथौत्पत्तिक्यादिकया बुध्या उपपेतो
युक्तः॥ तत्रौत्पत्तिकी अदृष्टाऽश्रुताऽननुभूतार्थविषया आकस्मिकी वैनयिकी गुरुविनयल
भ्यशास्त्रार्थसंस्कारजन्या कर्मजा कृषिवाणिज्यादिकर्माभ्यासप्रभवा पारिणामिकी प्रा
यो वयोविपाकजन्या तथा श्रेणिकस्य राज्ञो बहुषु कार्येषु च स्वकसेवकराज्यादिदानल
क्षणकृत्येषु विषयभूतेषु तथा कुटुंबेषु च स्वकीयपरकीयेषु विषयभूतेषु मंत्रादयो निश्चयां
ता तेषु आप्रच्छनीयः तत्र मंत्रा मंत्रणानि पर्यालोचनानि तेषु च गुह्यानीव गुह्यानि ल
ज्जनीयव्यवहारगोपनीयानि तेषु च रहस्यानि एकान्तयोग्यानि तेषु च विनिश्चयेषु च इत्थ
मेवेदं विधेयमित्येवंरूपनिर्णयेषु अथवा स्वतंत्रेषु कार्यादिषु विषयेषु च चकाराः
समुच्चयार्थाः आप्रच्छनीयः सकृत् प्रतिप्रच्छनीयो द्विःकृतः किमिति यतोऽसौ मेढिः खलि
खलकमध्यवर्त्तिनि स्थूणा यस्यां नियमिता गोपंक्तिः धान्यं ग्राहयति तद्वदयमा

ज्ञाताद्वृत्तिः सकलमंत्रिमंडलमंत्रणीयार्थान् ध्यायन्निव विवेचयतिभावः तथा प्रमाणं प्र
१६ त्यक्षादि तद्वद्यस्तद्दृष्टार्थानामव्यभिचारित्वेन तथैव प्रवृत्तिनिवृत्तिगोचरत्वात् स प्रमा
णं तथा आधारः आधेयस्येव सर्वकार्येषु लोकानामुपकारित्वात् तथा आलंबनं
रज्ज्वादि तद्वदापद्गर्तादिनिस्तारकत्वादालंबनं तथा चक्षुर्लोचनं तद्वल्लोकस्य वि
विधकार्येषु प्रवृत्तिनिवृत्तिविषयदर्शकत्वाच्चक्षुरिति एतदेव प्रपंचयति मेढि
भूए इत्यादि भूतशब्द उपमार्थः सर्वकार्येषु संधिविग्रहादिषु सर्वभूमिकासु अ
मात्यादिस्थानकेषु लब्धः उपलब्धः प्रतीतिरविसंवादिवचनं व्यवहारो यस्य स तथा
वियइण्णवियारेत्ति वितीर्णो राज्ञानुज्ञातो विचारोऽवकाशो यस्य विश्वसनीयत्वात्
असौ वितीर्णविचारः सर्वकार्यादिष्विति प्रकृतं अथवा विल वियारे विज्ञापिता
राज्ञो लोकप्रयोजनानामिवेदयिता किंबहुना राज्यधुराचिंतकश्चापि राज्यनिर्वा
हकश्चाप्यभूत् एतदेवाह श्रेणिकस्य राज्ञो राज्यं च राष्ट्रादिसमुदायात्मकं राष्ट्रं च
जनपदं च कोशं च भांडागारं कोष्ठागारं च धान्यागारं बलं च हस्त्यादिसैन्यं वाहनं

१६

च वेगसरादिकं पुरं च नगरं अंतःपुरं चावरोधनं स्वयमेवात्मनैव समुत्प्रेक्षमाणो
निरूपयन् समुत्प्रेक्षमाणो व्यापारयन् इह च द्विर्वचनमाभिक्ष्ण्ये वसेयं विहरति
आस्तेस्म धारिणी नाम देवी होत्था जाव सेणियस्स रन्नो इट्ठा जाव विहरइ इत्यत्र द्वि
र्यावच्छब्दकरणादेवं द्रष्टव्यं सुकुमालपाणिपाया अहीणपंचेंदियसरीरा लक्खणवं
जणगुणोववेया माणुम्माणपमाणपडिपुन्नसुजायसव्वंगसुंदरंगी ससिसोमाकारकंतपियदं
सणा सुरूवा करतलपरिमितो मुष्टिग्राह्यस्त्रिवलीकोरेखात्रयोपेतो बलयावन्मध्यो
मध्यभागो यस्याः सा तथा कोमुइरयणियरविमलपडिपुन्नसोमवयणा कौमुदीरजनी
करवत् कार्त्तिकीचंद्रवद् विमलं प्रतिपूर्णं सौम्यं च वदनं यस्याः सा तथा सिंगारागारचा
रुवेसा शृंगारस्य रसविशेषस्यागारमिवागारं अथवा शृंगारं मंडनं भूषणाटोपस्तत्प्र
धानः आकार आकृतिर्यस्याः सा तथा चारुवेषो नेपथ्यं यस्याः सा ततः कर्मधा
रयः तथा संगयगयहसियभणियचिट्ठियविलाससललियसंलावनिउणजुत्तो
वयारकुसला संगता उचिता गतहसितभणितविहितो विलासो यस्यां सा तथा तत्र वि
हितं चेष्टितं विलासो नेत्रचेष्टा तथा सह ललितेन प्रसन्नतया ये संलापाः परस्पर

ता॥ वेषलक्षणेन सेवु निपुणो यो सा तथा॥ युक्ताः संगता ये उपचारा लोकव्यवहारास्तेषु कुशला
या सा तथा तः पदत्रयस्य कर्मधारयः॥ पासाईया चित्तप्रसादजनिका॥ दरिसणिज्जा॥ यां प
श्यच्चक्षुर्न श्राम्यति॥ अभिरूवा मनोज्ञरूपा॥ पडिरूवा द्रष्टारं २ प्रति रूपं यस्याः सा त
थासेणा॥ यस्सरणो इट्ठा वल्लभा कंता काम्यत्वात्॥ पिया सदा प्रेमविषयत्वात्॥ मणुन्ना सुं
दरत्वात्॥ नामधेज्जा नामधेयवती॥ प्रशस्तनामधेयवतीत्यर्थः॥ नाम वा धार्यं हृदि धर
णीयं यस्याः सा तथा॥ वेसासिया विश्वसनीयत्वात्॥ सम्मया॥ तत्कृतकार्यस्य सम्मतत्वा
त्॥ बहुमता बहुशो बहुत्वेनान्येभ्यः सकाशान्मता बहुमानपात्रं वा॥ अणुमया विप्रियकर
णस्यापि पश्चान्मता अनुमता॥ भंडकरंडगसमाणा आभरणकरंडकसमा नोपादेय
त्वात्॥ तेल्लकेला इव सुसंगोविया॥ तैलकेला सौराष्ट्रप्रसिद्धो मृन्मयस्तैलस्य भाजन
विशेषः॥ स च भंगभयाल्लोठनभयाच्च सुष्ठु संगोप्यते॥ एवं सापि तथोच्यते॥ चेलापेडा
इव सुसंपरिगृहीया वस्त्रमंजूषेवेत्यर्थः॥ रयणकरंडगोविव सुसारक्खिया सुरक्षितेत्यर्थः
कुत इत्याह॥ मा णं सीयं मा णं उण्हं॥ मा णं दंसा मा णं मसया मा णं वाला मा णं चोरा मा
णं वाइय विविहा रोगायंका फुसंतुत्ति कट्टु सेणिएणं सद्धिं विउलाइं भोगभोगाइं भुंज

माणी विहरतित्ति॥ माशब्दा निषेधार्थाः॥ णंकारा वाक्यालंकारार्थाः॥ अथ माणंति एनामि
ति प्राकृतत्वात्॥ वाला श्वापदभुजगाः॥ रोगाः कालसहाः॥ आतंकाः सद्योघातिनः॥ इतिक
ट्टु इति हेतोर्भोगभोगान् अतिशयवद्भोगानिति॥ तएणं त्ति ततोनंतरं॥ तंसि तारिसयंसि
त्ति यदेवं वक्ष्यमाणगुणं तस्मिंस्तादृशके यादृशामुपचितपुण्यस्कंधानां मंजिनामुचि
तं॥ वरघरएत्ति संबंधः॥ वासभवने इत्यर्थः॥ कथंभूते॥ छक्कट्ठकं गृहस्य बाह्यालंदकं षट्दा
रुकमिति॥ यदागमप्रसिद्धं द्वारमित्यन्ये॥ तत्र विशेषणमिदमित्यन्ये॥ लष्टाः म
नोज्ञा मट्ठ मृष्टाः संस्थिता विशिष्टसंस्थानवंतः॥ ये स्तंभास्ते उद्गता ऊर्द्धगतास्तेषु वा
उद्गता व्यवस्थिता स्तंभेषूद्गता प्रवराणां वराः प्रवरवराः॥ अतिप्रधाना याः शालभंजि
काः पुत्रिकाः॥ तथा उज्ज्वलानां मणीनां चंद्रकांतादीनां कनकस्य रत्नानां च कर्के
तनादीनां स्तूपिका शिखरं॥ तथा विटंकः कपोतपाली वरंडिका धोवती स्फुर
विशेषः॥ जालं सच्छिद्रो गवाक्षविशेषः॥ अर्द्धचंद्रः अर्द्धचंद्राकारं सोपानं॥ निर्यूहकं
द्वारपार्श्वविनिर्गतदारु अंतरं स्फुरविशेषएव पानीयांतरमिति तत्राधारे व्यप
दिश्यते॥ निर्यूहकद्वयस्य यान्यंतराणि॥ तानि चानि निर्यूहकान्तराणि कणकालीस्त

ज्ञातावृत्तिः
१९

रविशेष एव चंद्रशालिका च गृहोपरि शाला एतेषां गृहांशानां या विभक्ति विभजनं विविक्तता त
या कलितं युक्तं यत्तत्तथा तस्मिन् सरसच्छवाऽबलन्नरइए त्ति स्थाप्यं केश्चित्पुनरेवमं
नावितमिदं सरसछधाउबलचन्नरइए त्ति तत्र सरसेनाच्छेन धातूपलेन पाषाणधा
तुना गेरुकविशेषेणेत्यर्थः वर्णो रचितो यत्र तत्तथा तत्र बाहिरउदूमीयघठमठे त्ति दू
मितं धवलितं घृष्टं कोमलपाषाणादिना अतएव मृष्टं मसृणं यत्तत्तथा तस्मिन् तथा अभ्यं
तरतः प्रशस्तं स्वकीयकर्मव्यापृतं शुचि पवित्रं लिखितं चित्रकर्म यत्र तत्तथा तस्मिन्
तथा नानाविधानां जातीभेदेन पंचवर्णानां मणिरत्नानां सत्कं कुट्टिमतलं मणिभूमिका य
स्मिंस्तत्तथा तत्र तथा पद्मोपमाकारैरेवं लताभिरशोकलताभिः पद्मलताभिर्वा मणिल
तिकाभिः पुष्पवल्लीभिः पुष्पप्रधानाभिः पत्रवल्लीभिः तथा वराभिः पुष्पजातिभिः शा
लवलीप्रभृतिभिः चित्रितमुल्लोकतलमुपरितनो भागो यस्मिन् तत्तथा इह च प्राकृ
तत्वेन उल्लोयचित्तियतले इत्येवं विपर्ययनिर्देशो द्रष्टव्य इति अथवा पद्मादिभिः
उल्लोकस्य चित्रितं तलमधोभागो यस्मिन् तथा वंदनमंगलघटाः ये वरक
नककलशाः सुष्ठु निर्मिता न्यस्ताः प्रतिपूजिताः चंदनादिचर्चिताः सरसपद्माः १९

सरसमुखस्थगनकमलाः शोभमानो द्वारभागेषु यस्य पाठांतरापेक्षया वंदनकरकनक
कलशैः सुन्यस्तैस्तथा प्रतिपूजितैः पुंजिकृतैः सरसपद्मैः शोभमानो द्वारभागो यस्य
तत्तथा तस्मिन् तथा प्रतरकाणि सुवर्णादिमया आभरणविशेषास्तत्प्रधानैः प्रलंब
मानैर्मणिमुक्तानां दामभिः स्रग्भिः सुष्ठु विरचिता द्वारशोभा यस्य तत्तथा तस्मिन् अथ
सुगंधिवरकुसुमैः मृदुकस्य मृदोः पक्ष्मलस्य च पक्ष्मवतः शयनस्य तूल्यादिशयनीय
स्य उपचारः पूजा उपचारो वा स विद्यते यस्मिन् मणइन्ते तस्य मत्वर्थीयत्वात् तत्सुगंधि
वरकुसुममृदुपक्ष्मलशयनीयोपचारवत् तत्र तत् हृदय निर्वृतिकरं च मनः
स्वास्थ्यकरं तत्तथा तस्मिन् ॥ तथा कर्पूरश्च लवंगादि फलविशेषस्योपचाराः ॥ मलयचंदनं फ व
च पर्वतविशेषसंबंधि श्रीखंडं कालागुरु च कृष्णागुरु प्रवरकुंदुरुक्कं चीडाभिधानो गंध
द्रव्यविशेषः ॥ तुरुक्कं च सिल्हकं धूपश्च गंधद्रव्यसंयोगज इति द्वंद्वः ॥ एतेषां वासं वं
धी यो धूपः तस्य दह्यमानस्य स्फुरति यो मघमघायमानो अतिशयवान् गंधस्तेनोद्धु
द्धुरः तेनाभिरामं अभिरमणीयं यत्तत्तथा तस्मिन् ॥ तथा सुष्ठु गंधवराणां प्रधानचू

ज्ञाताट° १९ र्णानां गंधो यस्मिन् तत्तथा गंधवरगंधिकं तस्मिंस्तथा गंधवर्त्तिः गंधद्रव्यगुटिका टिका
गंधवर्त्तिस्तद्भूतास्तौरभ्यातिशयात्तत्कल्पे तत्र मणिकिरणप्रणाशितांधकारे किं बहु
ना वर्णकेन वर्णकसर्वस्वमिदं द्युत्या गुणैश्च प्रवरविमानं विडंबयति जयति यद्वरगृहकं
तत्तथा तत्र तथा तस्मिन् तादृशके शयनीये सहालिंगनं वर्त्या शरीरप्रमाणोपधानेन यत्त
त्सालिंगनवर्त्तिकं तत्र उभओ विब्बोयणे त्ति उभयतः शिरोंतपादांतावाश्रित्य वि
ब्बोयणे त्ति उपधाने यत्र तत्तथा तस्मिन् दुहओ उन्नए त्ति उभयत उन्नते मध्ये नतं च तन्निम्न
त्वाद्गंभीरं च महत्त्वान्नतगंभीरं तत्र अथवा मध्येन मध्यभागेन नतगंभीरे वनते गंगापु
लिनवालुकायाः अवदालोऽवदलनं पादादिन्यासेऽधोगमनमित्यर्थः तेन सालिसए त्ति त
सदृशकमतिनतत्वाद्यत्तत्तथा तत्र दृश्यते च हंसतूल्यादिष्वयं न्याय इति तथा उवचिय त्ति
परिकर्मितं यत् क्षौमं दुकूलं कार्पासिकमतसीमयं वा वस्त्रं तस्य युगलापेक्षया यः प
ट्ट एकः शाटकः स प्रतिच्छदनं यस्य तत्तथा तत्र तथा आस्तरकोमलका
नवतकुशक्तलिंबः सिंहकेसरश्चैते आस्तरणविशेषास्तैः प्रत्यवस्तृतमाच्छादि १९

तं यत्तत्तथा तत्र ॥ इह चास्तरको लोकप्रतीत एव मलकंकुशक्तौ तु स्पष्टगम्यौ न च तत्कर्णा क
विशेषे [illegible] मा याजीवमिति लोके यदुच्यते जिनवालो [illegible] ऊर्णायुक्ताकृति ॥ सिंहकेस
रो जटिलकंबलः ॥ तथा सुष्ठु विरचितं रजस्त्राणं आच्छादनविशेषपरि
भोगावस्थायां यस्मिंस्तथा तत्र रक्तांशुकसंवृते मशककुटिकाभिधानवस्त्रवृते ॥ सुरम्य
तथा आजिनकं चर्ममयो वस्त्रविशेषः स च स्वभावादेति कोमलो भवति तथा रूतं
कर्पासपक्ष्म बूरो वनस्पतिविशेषः ॥ नवनीतं म्रक्षणं एतस्य तूलस्य स्पर्शो यस्य ॥
तूलं वा अर्कतूलं ॥ तत्र पक्षे एतेषामिव स्पर्शो यस्य तत्तथा तत्र पूर्वरात्रश्च पूर्वरात्र
श्च पूर्वरात्रापररात्रः ॥ स एव कालः लक्षणः समयः ॥ न तु सामाचारादिलक्षणः समयः ॥
न तु समाचारादिलक्षणं । पूर्वरात्रापररात्रकाललक्षणः समयस्तत्र मध्यरात्र इत्य
र्थः ॥ इह चार्षत्वाद् द्वकारे फलोपेन पूर्वस्तावरत्तेस्युक्तं ॥ अपररात्रशब्दो वा उपमितिसमासः सुत्ता
जागरा नातिसुप्ता नातिजाग्रती ॥ अह तएवाह ओहीरमाणी ओहीरमाणि त्ति वारं वारमीष
न्निद्रां गच्छंतीत्यर्थः ॥ एकं महांतं सप्तोत्सेधमित्यादि विशेषणं करमतिगलंगमं ह

ज्ञाताबृत्तिः ध्रुमतिबुद्धतियोगः तत्रस स्तोस्से धं तत्तस्कके सादिषु स्थानेषु न्नतं समइ स्तोद्धिलं
२० वा रयंयंतिरूपं णइ जेसिन्ति नसस्तत्रासक खमतिगतमिति योगः वाचनांतरे चेवं द
श्यते जाव सीइं स कविले यासि ता णंपविकुह तत्र यावत्करणादिदं दृष्टव्यं एगं च णं महं नपं
ररंधवलं से यए कार्य शद्ध त्रयोपादानं चात्यंत शक्लता ख्यापनार्थं एतदेवोपमानेनाह
संखदलविमलदहियणगोखीरफेणरयणिकरप्पमासं शंखकुलस्येव विमलदध्नाइ
व घन गोक्षीरस्येव विमल फेनस्येव रजनीकरस्येव प्रकाशः प्रभा यस्य स तथा तं अ
थवा हाररजतखीरसागरदगरयमहासेलमेकरतरो रूमणिज्जं हीरादिभ्यः पांडुरतरो यः
स तथा दगरज महाशैलो महाहिमवान् तथा उरुर्द्धि स्त्रीर्णः रमणीयो रम्यो तएचदर्शनीयइ
तिपदचतुष्टयस्य कर्मधारयो तस्तं तथा थिरलट्ठपउट्ठपीवरसुसिलिट्ठविसिट्ठतिक्ख
ग्गढाविडंबियमुरवंइ स्थिरावप्रकंपोलष्टो मनोज्ञो प्रकोष्ठो कूर्परग्रेतनसागोयस्य
स तथा विचराः स्फुराः श्लक्ष्णाः अविसर्वरा विशिष्टा मनोइराः त्रीक्ष्णाया दंष्ट्रास्ता
भिः कृत्वा विडंबियंति विवृतं मुखं यस्य तस्य स तथा ततः कर्मधारयो तस्तं तथा परि २०

कमियजच्चकमलकोमलमाइयसोहंत लट्ठउट्ठं परिकर्मितं कृतपरिकर्म माइंत्ति प
माश्वाधानपरिमितइत्यर्थः शेषं प्रतीतं तथा रत्तुप्पलपत्तमउयसुकुमालतालु
निल्लालियग्गजीहं रक्तोत्पलपत्रवन्मृदुकेभ्यः सुकुमालमतिकोमलं तालुवनि
र्लालिताग्र प्रासारिताग्रजिह्वा यस्य स तथा त तंतथा मक्कुगुलियसंतपिंग
लच्छं मक्कुगुलिके व श्लौद्र वर्त्तिव सिसंतत्ति दिप्यमाने पिंगले कपिले अक्षिणी
यस्य स तथा तं तथा मूसागयपवरकणगताविय आवत्तायंतवट्टतडियविम
लसरिसणयणं सूषागतं मत्रमातानविशेषस्थं यत्प्रवरकनकं तापितमग्नि
संधातात् आवत्तायंतत्ति आवर्तं कुर्वन् तथा वृत्ते च तडिते च विवृते विमले
च समाने नयने यस्य स तथा तं अत्र च वट्टतडु इत्येतावदेव पुस्तके दृष्टं सं तावच
यानुवृत्त तडित इति व्याख्यातमिति पाठांतरेण तु पट्टपडिपुन्नपसन्न ध्वनिद्ध
मुक्कुगुलियपिंगलच्छं म्फटश्चायंपाठः विसालपीवरत्तमरोरुपडिपुलविमल
खंधं विशालो विस्तीर्णः पीवरो मांसलः त्रामरोरुः चमरारोमावर्त्तागुरवो विस्ती

ज्ञातावृत्तिः
२१

र्णा यत्र स तथा परिपूर्णविमलश्च स्कंधो यस्य स तथा तं अथवा परिपूर्णस्कंधायतस्कंधं तत
था मिदुविसदसूक्ष्मलक्षणपसत्थविच्छिन्नकेसरसटं मृद्यो विशदाः अविमूढाः सू
क्ष्माः लक्षणप्रशस्ताः प्रशस्तलक्षणाः विस्तीर्णाः केसरसटाः स्कंधकेशा जटा यस्य
स तथा तं अथवा ऊसियमलवरकेसरधरं तथा ऊसियसुणिम्मियसुजाय अप्फा
डियलंगुलं उच्छ्रितमूर्द्धनिर्मितं सुष्ठु स्वंगुरत त्थान्यस्तं सुजातं तद्गुणोपेतं तथा आस्फो
टितं कृतविलोलं पुच्छं येन स तथा सोम्यं सोम्याकारं लीलायंतं लीलायंतं ति ली
लां कुर्वंतं जंभायंते ज्रंभमाणं शरीरचेष्टाविशेषं विदधानं गगणतलाउ उवयमाणं
सिंह अभिमुहं मुहे पविसमाणं पासित्ता पडिबुद्धत्ति अयमेयारूवं त्ति इमं महासुम
णमिति संबंधः एतदेव वर्णितस्वरूपं रूपं यस्य प्रस्पन कनिकृतमूनमधिकं यास तथा
था तं उरालं ति उदारं प्रधानं कल्याणं कल्याणानां वृद्ध्यादिविशेषाणां कारण
त्वात् कल्लं वा निरोगत्वम् अणति गमयति कल्याणं तद्धेतुत्वात् धन्यं धनावहत्वात्
मंगल्यं मंगले दुरितोपशमे साधु सश्रीकं सशोभमिति समाणी ति सती हृष्ट २१

तुष्टा अत्यर्थं तुष्टा अथवा तुष्टा विस्मिता तुष्टा तो त्ति चित्तमाणंदियत्ति चित्तेनानंदि
ता आनंदितं वा चित्तं यस्याः सा चित्तानंदिता मकार प्राकृतत्वात् प्रीतिर्मनसि
यस्याः सा प्रीतिमना परमसोमणंसिया परमसौमनस्यं जातं यस्याः सा परमसौम
नस्यिता हर्षवशेन विसर्पद्विस्तारयायि हृदयं यस्याः सा तथा सर्वाणि प्राय एकार्थिका
न्येतानि प्रमोदप्रकर्षप्रतिपादनार्थत्वात् स्तुतिरूपत्वाद्वा न दुष्टानि आह च वक्ता
हर्षभयादिभिराक्षिप्तमनास्तुवंस्तथा निंदन् यत्पदमसकृद्ब्रूयात्तत्पुनरुक्तं न दो
नदोषायेति पद्मोरुहइत्ति प्रत्यवरोहति अत्वरितं मानसौत्सुक्याभावेन अचपलं
कायतः असंभ्रांतया अस्खलंत्या अविलंबितया अविच्छिन्नया रायहंससरि
साए त्ति राजहंसगमनसदृश्या गत्या ताहिं ति याभिर्विशिष्टगुणोपेताभिर्गीर्भि
रिति संबंधः इष्टाभिस्तस्य वल्लभाभिः कांताभिः रतिलषिताभिः सदैव तेन
प्रियाभिरद्वेष्याभिः सर्वेषामपि मनोरमाभिः कथयापि मनः प्रियाभिः धन्या
भिः धनलंभिकाभिः मंगल्याभिः मंगले साध्वीभिः सश्रीकाभिरलंकारादिशोभाव

सा॰ह॰ २२

तीतिः हृदयगमनीयाभिः हृदयेयागच्छंति कोमलत्वात्सौभाग्याच्च तास्तथाताभिः
हृदयप्रह्लादनीयाभिः आह्लादिकाभिः मितमधुरभिरिति गंभीरं सश्रीकाभिः मिताव
र्णपदवाक्यपेक्षया परिमिता मधुरस्वरलः रिरिताः स्वरघोलनाप्रकारवत्यः गंभीरा
अर्थतः सश्रीकत्वसहिता श्रीयोक्तलक्षणलक्ष्म्या यास्तास्तथा ततःपदपंचकस्य कर्म
ज१ धारयस्ततस्ताभिर्वाग्भिः संपन्नैर्युक्ताः पुनःपुनर्जल्पंतीत्यर्थः नानामणिकनकरत्नानां
तत्किरणैश्चित्रं विचित्रं यत्तत्तथा तत्र तदासने सिंहासने आश्रयता गतिजनितश्र
मापगमात् विश्वस्तासमक्षोऽसौ तावात् अनुत्सुकावा सुखासनवरगयत्ति सुखेन
शुभेन वा आसनवरे गता स्थिता या सा तथा करतलाभ्यां परिगृहीतः आस्ते वर
तलपरिगृहीतस्तं शिरस्यावर्त्त आवर्त्तनं परिभ्रमणं यस्य शिरस्यावर्त्तः इत्ये
के शिरसा अप्राप्त इत्यन्ये तमंजलिं मस्तके कृत्वा एवमवादीत् कमणेत्यादि
कोमन्ये कल्याणः फलवृत्तिविशेषो भविष्यति इदमन्ये इति वितर्कार्थो निपा
तः सोवत्तिश्रुत्वा श्रवणतः निशम्यावधार्य हृष्टतुष्टा यावद्धिसर्पहृदयः तथा २२

वाचनांतरे पुनरिदमाद्विवर्णकेवदमुपलभ्यते धाराहयनीवसुरहिकुसुमसंचुचुमालइय मा
तणु ऊसवियरोमकूवेत्ति तत्र नीपः कदंबः धाराहतनीपसुरभिकुसुममिव चुंचु
मालइयात्ति पुलकिताततुर्यस्यसः तथा किमुक्तं भवति ऊसवियत्ति उच्छूता रोमकू
पा रोमरंध्राणि यस्य स तथा तं स्वप्नमवगृह्णाति अर्थावग्रहेण इहामनुप्रविशतीति सदर्थप
र्यालोचनलक्षणं ततः अप्पणोत्ति आत्मसंबंधिना स्वाभाविकेन सहजेन मतिपूर्वे
ण आभिनिबोधिकप्रभवेन बुद्धिविज्ञानेन मतिविशेषभूतौत्पत्तिक्यादिबुद्धिरू
पपरिच्छेदेन अर्थावग्रहं स्वप्नफलनिश्चयं करोति ततोवादीत् उरालेन मित्या
दि अर्थलाभ इत्यादिषु भविष्यतीति शेषाद्रूपः एवमुपबृंहयन्ननुमोदयन् ए
वंसलुत्ति एवरूपादुक्तफलासाधनसमर्थात्स्वप्नात् दारकं प्रजनिष्यसीति संबंधरूप
मिपुन्नाणंति पूर्णैर्बहुभिः सत्तमस्यपर्यत्वात् अर्धमष्टमानां अर्धाष्टमानि तेषु रात्रिंदि
वेषु होरात्रेषु व्यतिक्रान्तेषु कुलकेत्वादीन्येकादशपदानि तत्र केतुश्चिह्नंध्वजइत्य
र्थः केतुरिवकेतुरद्भुतत्वात् कुशलस्यकेतुः कुशलकेतुः पाठान्तरेण कुशलहेतुः

ज्ञाताद्वृत्तिः
२३

कारणं एवं दीप इव दीपः प्रकाशकत्वात् ॥ पर्वतोनतिलंघनीयः स्थिरश्च साधर्म्यात् ॥ अव
तंसकः शेखरः ॥ उत्तमत्वात्तिलको विशेषकः भूषणत्वात् ॥ कीर्त्तिकरः ख्यातिकरः ॥
क्वचिद्वृत्तिकरमित्यादि दृश्यते वृत्तिश्च निर्वाहः ॥ नंदिकरो वृद्धिकरः ॥ यशः सर्वदिग्गा
मिप्रसिद्धिविशेषस्तत्करः ॥ पादपो वृक्षः आश्रयणीयच्छायात्वात् ॥ विवर्द्धनं विवि
धैः प्रकारैः वृद्धिरेव तत्करं विर्णयपरिणयमेत्तन्ति विन्नकः परिणत ... मात्रश्च
कलादिग्राहित इति गम्यते तथा शूरो दानतोऽभ्युपेतनिर्वाहणतो वा वीरः संग्रामतः विक्रां
तो भूमंडलाक्रमणतः ॥ विस्तीर्णविपुलेऽतिविस्तीर्णे बलवाहने सैन्यगवादिके य
स्य तथा राजपतिराजस्य तं अयइत्यर्थः ॥ नमितिय मस्मादेवं तस्मादुदारादिविशेषणः स्वप्न
स्तस्मे । मेत्ति त्वया दृष्ट इति गमनं एवमेतदिति राजवचनेनास्य यथावाविष्करणमेतदेवस्फु
टयति । तहमेयं तितथैव यथा स वंतः प्रतिपादयंति । अनेनान्वयतस्तद्वचनसत्यतो
क्ता अवितहमेयंति अनेन व्यतिरेकतस्तावः असंदिद्धमेय मित्यनेन संदेहाभावतः
इच्छि यंति इष्टं इष्मितं च पडिच्छियंति प्रतीप्सितं वा अभ्युपगतमित्यर्थः इष्टप्र २३

तीष्टमीप्सितप्रतीप्सितं वा धर्मद्वययोगात् अत्यंतादरख्यापनाय चैवं निर्देशः
इति कट्टु इति सण्णित्ता उत्तमेत्ति स्वरूपतः पहाणेत्ति फलतः एतदेवाह
मंगल्लेत्ति मंगलेसाधकस्वप्नेति सुमिणजागरियंति स्वप्नसंरक्षणार्थं जागरि
कां तां प्रतिजाग्रती विदधती पच्चूसेत्यादि प्रत्यूषकालसमयः समयोऽव
सरः सतथा तत्र कोटुंबिकपुरुषानादेशकारिणः सद्दावेइत्ति शब्दं करोति शब्दय
ति उपस्थानशालां आस्थानमंडपं गंधोदकेन सिक्ता शुचिका पवित्रा संमा
र्जिता कचवरापनयनेन उपलित्ता छगणादिना या सा तथा तां इदं च विशेषणं
गंधोदकसिक्तसंमार्जितोपलिप्तशुचिकामित्येवं दृश्यं नितायमंतरसावि
त्वाशुचिकत्वस्य तथा पंचवर्णः सरसः सुरभिश्च मुक्तः क्षिप्तः पुष्पपुंज
लक्षणो उपचारः पूजा तेन कलिता या सा तथा तां कालेत्यादि पूर्ववत् आ
णत्तियं पच्चप्पिणंतीति आज्ञप्तिमादेशं प्रत्यर्पयंति कृतां सतीं निवेदयंति क
ल्लमित्यादि कल्यमिति श्वः प्रादुःप्रकाशे तत्र प्रकाशप्रभातायां रजन्यां

फुल्लोत्पलकमलोत्तयोः कोमलमकठोरमुन्मीलितदलानयनयोर्यत्रोन्मील
नं यस्मिंस्तत्तथा तस्मिन्नथ रजनीविभातान्तरपांडुरे प्रभाते उपत्ति
रक्ताशोगेत्यादि रक्ताशोकस्य प्रकाशः प्रभा स च किंशुकं च पलाशपुष्पं शुक
मुखं गुंजाफलविशेषो रक्तकृष्णस्तदर्धं च बंधुजीवकं च बंधूकं पारापतः प
क्षिविशेषस्तच्चरणनयने च परस्तः कोकिलः तस्य स्फुरल्लोचनं च नासरमण
इति जपावनस्पतिविशेषस्तस्याः कुसुमं ज्वलितज्वलनो ग्रतपनीयकलश
श्च हिंगुलकोवर्णकविशेषस्तन्निकरश्च राशिरिति द्वंद्वः तत एतेषां यद्रूपं ततो ति
रेकेणाधिक्येन रेहंत शोभमानास्याः स्वकीया श्रीर्वर्णलक्ष्मीर्यस्य स तथा त
तस्मिन् दिवाकरे आदित्ये अथानंतरं क्रमेण रजनीक्षय पांडुरप्रभातक्कर
णलक्षणेन उदिते उद्गते तस्स दिणकरपरंपरावयारपारद्धंमि अंधकारे त्ति तस्य
दिवाकरस्य दिने दिवसे अधिकरणभूते दिनायः करपरंपरायाः किरणप्रवा
हस्यावतरणं तेन प्रारब्धमारब्धमपनयितुमिति गम्यते अपराद्धवा वेना

शितं दिनकरपरंपरावतारप्रारब्धं तस्मिन् सति इह च तस्येति सापेक्षत्वेपि समासस्त
थादर्शनात् अंधकारे तमसि तथा बालतपं एव कुंकुमं तेन खचिते इव रंजिते इव जी
वलोके सति तथा लोचनविषयस्य यः दृष्टिगोचरस्य यो अणुआरो त्ति अनुकाश
विकाशो विकसद्विवादं निरितस्तस्मिन् कस्मिन्निति आह लोके अयमभिप्रायोऽन्ध
कारस्य क्रमेण हानौ लोचनस्य विषयविकाशः क्रमेणैव भवति स च विकसतं लो
के दर्शयत्येव अंधकारसद्भावे दृष्टेरप्रसरणे लोकस्य कीर्णस्य च प्रतिभासनादि
ति तथा कमलाकरा ह्रदादय स्तेषु खंडानि नलिनीखंडानि तेषां बोधके यस्मि
न् उत्थिते उदयानंतरावस्थां प्राप्ते सूरे आदित्ये किं भूते सहस्ररश्मि तथा दिन
करे णशीले तेजसा ज्वलति सतीति अदृण साल त्ति अदनशालाम्यायामशाले
त्यर्थः अनेकानि यानि व्यायामयोग्यं च गुणनिका वल्गामर्दनं च परस्परेण बाहु प्रं
गमोटनं मल्लयुद्धं करणानि अंगसंगविशेषा मल्लशास्त्रप्रसिद्धानि तैः श्रां
तः सामान्येन परिश्रान्तोंगप्रत्यंगापेक्षया सर्वतः शततैलोधस्य कं शतेन वाका

र्षपणानां यत्पक्वं तत्शतपक्वमेव मितरणदपि सुगंधिवरतैलादिभिरभ्यंगैर्योगैः आ
दिशब्दात् घृतकर्पूरपानियादिग्रहः किंभूतैः प्रीणनीयैः रसरुधिरादिधातुसमताका
रिभिः दीपनीयैरग्निजननैः दर्पणीयैर्बलकरैः मदनीयैर्मन्मथवर्धनैः बृंहणीयैर्मां
सोपचयकारिभिः सर्वेंद्रियगात्रप्रह्लादनीयैः अभ्यंगैलेहनैः अभ्यंगः अपि तेषु य
स्यासौ अभ्यंगितः सन् ततः तैलचर्मणि तैलाभ्यक्तस्य संबाधनाकरणाय यच्चर्म
तत्तैलचर्म तस्मिन् संवाहिते समाणेत्ति योगः कैरित्याह पुरुषैः किंभूतैः प्रतिपूर्ण
नां पाणिपादानां सुकुमालकोमलान्यतिकोमलानि तलान्यधोभागा येषां ते तथा तैः
छेकैरवसरज्ञैर्द्वासप्ततिकलापंडितैरिति च वृद्धाः दक्षैः कार्याणामविलंबितकारि
भिः प्रष्ठैर्वाग्मिभिरिति वृद्धव्याख्या अथवा प्रष्ठैरग्रगामिभिः कुशलैः साधुभिः
संबाधनाकर्मणि मेधाविभिः अपूर्वविज्ञानग्रहणशक्तिष्टैः निपुणैः क्रीडाकुश
लैः निपुणशिल्पोपगतैर्निपुणानि सूक्ष्माणि यानि शिल्पानि अंगमर्दनादीनि ता
न्युपगतान्यधिगतानि येस्ते तथा तैः जितपरिश्रमैः व्यायामं तु छेकैः प्रयोगज्ञैः

२५

शीघ्रकारिभिः पट्ठेहिं त्ति प्राप्तार्थैरधिगतकर्मनिष्ठैः तैः कुशलैरालोचि
तकारिभिः मेधाविभिः सकृत्श्रुतदृष्टकर्मज्ञैः निपुणैरुपायारंभिभिः निपुण
शिल्पोपगतैः सूक्ष्मशिल्पसमन्वितैरिति अभ्यंगनपरिमर्दनोद्वलनानां क
रणे ये गुणास्तेषु निर्मितैः आस्थासुखहेतुत्वादस्थिसुखतया संबाधनयेति वि
श्रामणयः अपगतपरिश्रमः समंतजालाभिरामे समंतात्सर्वतो जालकैर्गवा
क्षितिछिद्रवदवयवविशेषैरभिरामो रम्यो यः स्नानमंडपः स तथा पाठां
तरे समत्तजालाभिरामे तत्र समस्तो जालकैरभिरामो यः स तथा पाठान्तरेण
समुत्तजालाभिरामे सदमुक्ताजालाभिरामे सदमुक्ताजालैर्योवर्त्तते अभि
रामश्च स तथा तत्र शुभोदकैः पवित्रस्थानोद्धृतैर्गंधोदकैः श्रीखंडादिमिश्रि
तपुष्पोदकैः पुष्परसमिश्रैः शुद्धोदकैः स्वाभाविकैः उष्णोदकैः कथं मज्जित इ
त्याह नवरस्नानावसरे यानि कौतुकशतानि रक्षादीनि तैः पम्हलेत्यादि पक्ष्मला
पक्ष्मवती अत एव सुकुमाला गंधप्रधाना काषायिका कषायरक्तशा

ज्ञाता॰ हिकातया ललितमंगं यस्य स तथा अहतं मलमूषिकादिभिरनुपद्रुतं प्रत्यग्रमि
२६ त्यर्थः स महार्घदूष्यरत्नं प्रधानवस्त्रं तेन सुसंवृतः परिगतः तथा सुकृतं संवृतं प
रिहितं येन स तथा शुचिनि पवित्रे माला च पुष्पमाला वर्णकविलेपनं च मंडनका
रि कुंकुमादिविलेपनं यस्य स तथा आविद्धानि परिहितानि मणिसुवर्णानि यस्य
स तथा कल्पितो विन्यस्तो हारो अष्टादशसरिकः अर्द्धहारो नवसरिकः त्रिसरकं
च प्रतीतमेव यस्य स तथा प्रालंबो झुंबनकं प्रलंबमानो यस्य स तथा कटिसूत्र
णेकच्छाभरणविशेषेण सुष्ठु कृता शोभा यस्य स तथा तथापिद्धग्रैवेयस्य कर्मधा
रयः अथवा कल्पितहारादिभिः सुकृता शोभा यस्य स तथा तथा पिनद्धा
नि परिहितानि ग्रैवेयकांगुलीयकानि येन स तथा ललितांगके अन्यान्यपि
ललितानि न्यस्तानि आभरणानि यस्य स तथा ततः पदद्वयस्य कर्मधारयः
ततथा नानामणीनां कटकत्रुटिकैर्हस्तबाह्वाभरणविशेषैर्बहुत्वात् स्तंभि
ताविव स्तंभितौ भुजौ यस्य स तथा अधिकरूपेण सश्रीकः सशोभः स तथा २६

कुंडलोद्योतिताननः मुकुटदीप्तशिरस्कः हारेणावस्तृतमाच्छादितं तेनैव सुकृ
तरतिकं च वक्षः उरो यस्य स हारावस्तृतसुकृतरतिकवक्षाः मुद्रिकापिंग
लांगुलीकः मुद्रिकाः अंगुल्याभरणानि ताभिः पिंगलाः कपिलाः अंगुलयो यस्य
स तथा प्रलंबेन दीर्घेण प्रलंबमानेन च सुकृतपटेनोत्तरीयमुत्तरासंगो ये
न स तथा नानामणिकनकरत्नैर्विमलानि महार्हाणि निपुणेन शिल्पिना उविय
त्ति उपरिकर्म्मितानि मिसिमिसिंत त्ति दीप्यमानानि यानि विरचितानि निम्मिता
ति निर्म्मितानि तानि सुश्लिष्टानि सुसंधीनि विशिष्टानि विशेषवन्त्यन्येभ्यो लष्टा
नि मनोहराणि सुसंस्थितानि प्रशस्तानि च आविद्धानि परिहितानि वीरवलयानि ये
न स तथा सुसंहिय यदि कश्चिदन्योप्यस्ति वीरव्रतधारी तदासौ मां विजित्य मो
चयत्वेतानि वलयानीति स्पर्द्धयन् यानि परिदधाति तानि वीरवलयानीत्युच्य
न्ते किं बहुना वर्णितेनेति शेषः कल्पवृक्ष इव सुष्ठु अलंकृतो विभूषितश्चा
फलपुष्पादिभिः कल्पवृक्षो राजा तु मुकुटादिभिरलंकृतो विभूषितस्तथा

ज्ञाता वृत्तिः दिसिदिसि मऊकोरिंटकप्रधानैर्माल्यदामभिर्यच्छत्रं तेन ध्रियमाणेन कोरेंटकपु
२७ ष्पजातिः तत्पुष्पाणि माल्यानि तेषु शोभार्थं दीयंते माल्यानि हि तानि माल्यानि पुष्पाणि
दामानि मालाः इति चतुर्णां चामराणां प्रकीर्णकानां वालैर्वीजितमंगं यस्येति वाक्यं मं
गलसूक्तं जयशब्दकृतालोकेन यस्य स तथा तथा अनेके ये गणनायकाः प्रकृति
महत्तरा दंडनायकाः तंत्रपालाः राजानो मांडलिकाः ईश्वरा युवराजाः अणिमा
द्यैश्वर्ययुक्ताः तलवराः परितुष्टनरपतिदत्तपट्टबंधविभूषिताः राजस्थानीया मां
डंबिकाः छिन्नमडंबाधिपाः कौटुंबिकाः कतिपयकुटुंबप्रभवाः अवलगकाः
मंत्रिणः प्रतीताः महामंत्रिणो मंत्रिमंडलप्रधाना हस्तिसाधनोपरिका इति वृद्धाः
गणकाः गाणितिकाः भांडागारिका इति वृद्धाः दौवारिकाः प्रतिहाराः राजद्वारिका वा
अमात्या राज्याधिष्ठायकाः चेटाः पादमूलिकाः पीठमर्दा आस्थाने आसना
सीनसेवका वयस्या इत्यर्थः नगरं नगरवासिप्रकृतयः निगमाः कारणिकाः
श्रेष्ठिनः श्रीदेवताध्यासितसौवर्णपट्टविभूषितोत्तमांगाः सेनापतयः नृपति

नृपतिनिरूपिताश्चतुरंगसैन्यनायकाः सार्थवाहाः सार्थनायकाः दूता अन्येषां
गत्वा राजादेशनिवेदकाः संधिपाला राज्यसंधिरक्षकाः एषां द्वंद्वः ततस्तैरिह
तृतीयाबहुवचनलोपो द्रष्टव्यः सार्द्धं सह नेकेवलं तैः सहितः अभिसंपरिवृतः सम
न्तात्परिवृतः परिकरित इति न मत्तिरयति मज्जनगृहात्प्रतिनिष्क्रामति नि
ष्क्रामतीति संबंधः किंभूतः प्रियदर्शनः किमिव धवलमहामेघनिर्गत इव ग्रहग
णदीप्यमान ऋक्षतारकगणानां मध्ये इव वर्त्तमान इति सिद्धार्थकप्रधानो यो मंगलोपचारस्तेन कृ
तेशान्तिकर्मविशेषो यस्य स तथा अनेकमंगलोपचारकृतशान्तिकर्मा
... अधीके प्रेक्षणीयं रूपं यस्याः रूपाणि वा यस्यां सा तथा
तां महार्घवरपट्टनोद्गतवरवस्त्रे यस्तिस्थाने उद्गता चच्युता तां श्लक्ष्णानि
बहुभक्तिशतानि यानि चित्राणि तेषां स्थानं तदेवाह ईहामृगवृकाः ऋषभ
तुरगनरमकरविहगव्यालाः प्रतीताः व्यालाः श्वापदभुजगाः किन्नरा व्यंतर

विशेषाः रुरवो मृगविशेषाः सरभाः आटव्या महाकायपशवः पराशरा इति प
र्यायः चमराः आटव्या गावः कुञ्जरा दिनः वनलता अशोकलताः पद्म
लताः प्रतीताः एतासां या भक्तयः विच्छित्तयस्ताभिश्चित्रा या सा तथा
तां स्फुरदचिता मंमिता वरकनकेन प्रवराः पर्यन्ता नामेचलकर्णवर्त्तिल
क्षणा नंदेशभागाः अवयवाः यस्यां सा तथा तां अभ्यंतरिकाअवकाशप्रशस्ता
या अभ्यंतरतायवर्त्तिनीयमनिकां समुपस्यआछादेतित्ति आयतां कारय
ति आस्तरकेण प्रतीते मृदुकमसूरकेण च प्रतीते नावस्तृतं यत्तत्तथा धव
लवस्त्रेण प्रत्यवस्तृतमाछादितं विशिष्टशोभनं अंगस्पर्शं यस्य तत्तथा अ
शंगमसूरसेरंदियोस्यातां तरिक्षादिसेदंय म्हाणनिमित्तं स्नानविशेषः तस्य तत्रार्थपा
इकाये तेतानूविल एलवयणं पडिसूणेंतित्ति प्रतिशृण्वंति आस्फपाश्वांत वचनं विनयेन
किं स्त्वते नेत्याह एवमित्ति यथैव यूयं तथैव वदेवोत्ति इदवतइत्तित्ति नान्यथा
आलयाश्रवद्देशेन कोष्ठामदृत्ते वनस्फपागमस्तत्र चकपरचतुष्प सत्तणनरूपे २८

णेति जीवाहिवचसि इरिसवसविसप्पमाणहियया स्नानानंतरं कृतं बलिकर्म यैः स्वगृहदे
वतानां ते तथा जीवपायच्छित्तेत्ति कयकोउयमंगलपायच्छित्ता तत्र कृतानि मैंगकौतुक
मंगलान्येव प्रायश्चित्तानि दुःस्वप्नादिविघातार्थमवश्यकरणीयत्वाद्येति तथा तत्र कौ
तुकानि मषीतिलकादीनि मंगलानि तु सिद्धार्थकदध्यक्षतदुर्वांकुरादीनि हरितालिका
दूर्वांकुरा सिद्धार्थकांश्च कृत्वा मूर्द्धनि ये स्ते तथा क्वचित् सिद्धत्थयहरियाकयमंगल
मुद्धाणएवं पाठः स्वकेस्यः आत्मीयेस्य इत्यर्थः जएणविजएणं बद्धावेत्ति जयेन विजये
न वर्द्धयंत्यमित्याचक्षत इत्यर्थः तत्र जयः परैरनभिभूयमानता प्रतापवृद्धिश्च विजय
स्तु परेषामभिभव इति अर्चिताश्चंदनादीना वंदिताः सद्गुणकीर्त्तनेन पूजिता पुष्पैः
मानिताः दृष्टिप्रणामतः सत्कारिताः फलवस्त्रादिदानतः सन्मानितास्तथाविधया प्र
तिपत्त्या समाणित्तिसत्तः आसणमणेण सहिंति अन्योन्येन सहइत्येवं संचालेंति
संचालयंति संचारयंति पर्यालोचयंतीत्यर्थः लद्धार्थाः स्वतः पृष्टार्थाः पराभि
प्रायग्रहणतः तत एवं विनिश्चितार्थाः अतएव अभिगतार्थाः अवधारितार्थाः इ

ज्ञाताधृत्तिः त्यर्थः गब्भवक्कममाणंसि त्ति गर्भाव्युत्क्रामति सत्यधिमाने अभिषेक इति। क्रिया
२९ विमानं यो देवलोकादवतरति तं माताऽपश्यति यस्तु नरकादुद्धृत्योत्पद्यते न माता
भवनमिति चतुर्दशैवेति स्वप्ना विमानभवनयोरेकतरदर्शनादिति विलाय परिण
यमेत्ति विज्ञातं विज्ञानं परिणतमात्रं यस्य स तथा केचित्तु विन्नयं पत्तिपाठः स च व्या
ख्यात एव जीवियारिहंति आजीवितमर्यादयोचितं जोइ जेपाउब्भविहत्ति हेइदेमनोर
थः प्रादुर्भूतवान् तथाहि धन्नेलब्धा साधन्याल्लाया अकालमेघदोहदं वितन्वती
तियोगः अम्मयाउत्ति अंबापुत्रमातरः स्त्रिय इत्यर्थः संपूर्णा परिपूर्णा आदेशवत
त्तिः कृतार्थाः कृतप्रयोजनाः कृतपुण्याः जन्मान्तरोपात्तसुकृतलक्षणाः कृतल
क्षणा शरीरलक्षणाः कृतविभवाः कृतसफलसंपदः सुलब्धं तासां मानुष्यकं म
नुष्यसंबंधि जन्मनि तत्त्वे। जीवितफलं जीवितव्यप्रयोजनं जन्मजीवितफलं सापे
क्षत्वेपि समासः छांदसत्वात् यामेघेषु अब्भुग्गतेषु अभ्युद्गतेषु समुन्नतेषु सर्वत्र ए
वं सर्वत्र सप्तमी योज्या अब्भुज्जतेषु वर्धितुं प्रवृत्तेषु गगनधैमलव्यापनेनोन्न २९

तिमत्सु अब्भुट्ठिएसु प्रवर्षणाय कृतायोगेषु सगर्जितेषु सुष्टुमहाध्वनितेषु सविद्यु
तेषु प्रतीतं सफुसिएसु त्ति प्रवर्त्तप्रवर्षणबिंदुषु सस्तनितेषु कृतमंदमंदध्वनिषु ध्माते
नाग्निसंयोगेन यो धौतः शोधितो रौप्यपट्टो रजतपत्रकं स तथा अंकोरत्नविशेषः शं
खचंद्रौ प्रतीतौ कुंदः पुष्पविशेषः शालिपिष्टराशिर्व्रीहिविशेषः चूर्णपुंज एतत्सम
प्रभा येषां ते तथा तेषु शुक्लेष्वित्यर्थः तथा चिकुरो रागद्रव्यविशेषः एवं हरिताल
वर्णकद्रव्यसेदस्त कुंडिकाप्रचंपक चंपकः सनकोरेंटकसर्षपग्रहणात् सत्पुष्पालि
ग्रहणं तेप मरजः प्रतीतं तत्समप्रभेषु वा वनान्तरे सनस्थाने काञ्चनं सर्षपस्थाने सत्त
पत्रोवत्तिपच्यते। तत्र चिकुरादि रिसहशाश्च तेपमरजः समप्रभाश्चेति विग्रहे
तस्तेषु पीतेष्वित्यर्थः तथा लाक्षारसेन सरसरक्तकिंशुकेन जपासुमनोभि रक्त
बंधुजीवकेन बंधुजीवकं हि पंचवर्णं भवति रक्तत्वेन विशिष्यते जातिहिंगुलकेन व
र्णकद्रव्येण संकुत्रिमो पि भवतीति जात्या विशेषितः सरसं कुंकुमेन नीरसं हि वि
जक्षितवर्णं भवतीति सरसमुक्तं तथा उरभ्र उरणः शशः शशकः तयो रुधिरेण

ऋतुसंहृतिः
३०

स्तेन इंद्रगोपको वर्षासु कीटविशेषस्तेन समाप्रभा येषां ते तथा तेषु रक्तेष्वित्यर्थः तथा
बर्हिणो मयूरः नीलरत्नविशेषः गुलिकावर्णकद्रव्यं शुकसारसौ पक्षिविशेषयोः पिच्छं
पत्रं स्तंगः कीटविशेषस्तस्य पत्रं पक्षः सासा काचीय नामा वृक्षविशेषः अथवा सामग
त्तिपाठः तत्र स्यामाप्रियुः नीलोत्पलनिकरः प्रतीतः नवशिरीषकुसुमानि च नवशा
द्वलं प्रगृह्य हरितं एतत्समप्रभेष्वित्यर्थः तथा जात्यं प्रधानं यदंजनं सौवीरकं स्तंगसेंद्रः
स्नगाशिधानस्य कीटस्य विशेषः विदलिताङ्गारो वा रिष्टाकं रत्नविशेषः स्तमएवजी
प्रतीता गवलगुलिका महिषशृंगगोलिका कज्जलं मषी समप्रभेषु कृष्णेष्वित्यर्थः स्फु
रद्गमक श्वसगर्जिताभ्रमेतेषु तथा वातवशेन विपुलेन मार्गेन चपलं यथा भवत्यावर्त्तत्येवं
परिसक्षिरेमुंति परिक्षुतं शीलं येषां ते तथा निर्मलपरकारिधारासिः प्रगलितः स्फ
रितः प्रचंडमारुतसमाहतः सन्समोच्छरं तिस्ति समबहलं रणं श्वमहीपीठमाक्रौ
मन् उपर्युपरि ग्रसातन्ये त्वरितश्वशीघ्रास्या बर्षोजलसमूहः सलपातं प्रवृष्टेषु बर्षितु
मारब्धेषु मेघेष्विति प्रक्रमः धारागणपद करोति निकरस्तस्य निपातः पतनं तेन निर्वा
पितं शीतलीकृतं यस्तस्तथा तस्मिन् निर्वापित शष्पाद्वसस्त्येकवचनं जातौ दृश्यः क ३०

स्मिन्निस्याह मेदिनीतले तथा हरितकानां हरित्तृणानां योगणः सएव कंचुको यत्राकार
त्वात् तत्तथा तत्र पक्ष विधये स्थिद्रष्टसन्तमिबहुवचनं जोवोदृश्यः ततः पत्रवितेषु पादप
गणेषु तथा गन्धिचितानेषु प्रसरितेषु प्रसरितेषु जातसंसरितेष्वित्यर्थः लघोन्नतेषु स्तन
देशेष्विति गम्यते सौत्ताग्यमुपगतेषु अनवस्थितजलत्वेनाकर्दमत्वात् पाठान्तरेषु
नगेषु पर्वतेषु नदेषु वाद्रेषु तथा वैसारास्थिमस्य गिरेः येप्रपाततराश्च पर्वतैकदेशा
स्तेभ्यो ये विन्दुसा प्रवृत्ता स्तेतथा तेषु कषु उधरेष्वन्ति निर्झरेषु त्वरितप्रभाविते नयः
पयो हंति प्रहर्षसमुत्पन्नः फेनस्तेनाकुलं व्याप्तं सलकलुसंति स कालुष्यं जलं वहंतो धुनि
रिनदीषु सर्जार्जुननीपकुटजातां वृक्षविशेषाणां यानि कदम्बानि प्ररोहाः सितिलिंधा
श्च छत्रकानितैः कलिताः श्रियानितपातच्छूपवनेषु तथा मेघरत्तिलेन हृष्टतुष्टा अति
हृष्टाः स्वेष्टिताश्चकृतचेष्टायेते तथा तेषु इदं सप्तमीजोपाते हर्षवशात् प्रमुक्तो मुकु
लिकृतः कंठोगलो यस्मिन्स्तथा चामौ केकारवश्च तं मुंचन्तः बर्हिणेषु मयूरेषु त
था ऋतुवशेऽीन कालविशेषवलेनयो मदस्तेन जनितं तरुणं सचरीतिः सुवतिम

श्यामा इति: ॥३१॥

परितिः सह प्रवृत्तं प्रवर्त्ततं तेषां तेन तथा तेषु बर्हिगलेच्छित्यत्वयः ॥ नवः स्फारित श्वय:
सितिलिंध्रकुटजकेरलकादंबलक्षणानां पुष्पाणां गंधस्तेन या ध्राणिस्तृप्तिः स्तां मुं
चस्सु गंधोत्कर्षतां विदधाने वित्यर्थः ॥ उपवनेषु सवनासन्नवनेषु ॥ तथा परस्तला
नां कोकिलानां यद्रुतं रवो रितितं स्वरघोलनाव त्तेन संकुजानि या न्युपवनानि तथा
तेषु ... सपिंडिला मिलिता: दृप्ता दर्पिता: स्मराणां च मधुकराणां च पटैर्वृंदैः ... प
पुनेषु ... नि तथा परिलिंतनि परिलीयमानाः संश्लिष्यंतो बलाः पक्षद्वयः उद्दाइति शो
नमा गाः रक्ताः इंद्रगोपकाः कीटविशेषा बालाचकानां चातकानां कारुण्य प्रधानं विज
पनं च येषु तानि तथा तेषूपवने ॥ त्विपत्वयः ॥ तथा वनतले रोमं फिनानि यानि तथा ते
षु ददुराणां प्रकृष्टं जल्पितं येषु तानि ॥ तथा तेषु सपिंडिला: मिलिता: दृप्ता: दर्पिता स्म
राणां च मधुकराणां च पटैर्वृंदैः निकरा येषु तानि तथा परिलिंतनि परिलीयमानाः
संश्लिष्यंतो मत्ता बर्हिणः कुसुमासवलोलाः मकरंदजं पराग मधुकरं कलं गुंजंतः ॥
राक्षायमानो देशस्तेषु येषां तानि तथा ततः कर्मधारयः ॥ ततः तेषु उपवनेषु ॥ तथा परि

३१ ॥३१॥

न्यामिलाः कृष्णीकृताः सांद्रमेघाच्छादनात् पाठांतरेण परिधामिलाः कृतप्रसास्त्वंशाः चंद्रसू
र्यग्रहणं यस्मिन् प्रणष्टा नक्षत्रतारकग्रता यस्मिन् नंबरतले इति योग: इंद्रायुधलक्षणे
बहु चटुञ्चिह्न पट्टो ध्वजपटो यस्मिन् तथा सत्यां बरे तले गगने उड्डीनबलाकापंक्तिशोभमा
न मेघवृंदे ऽम्बरतले इति योग: तथा कारंडकादीनां पक्षिणां मानससरो गमनादिमुत्सो
त्सुक्य करे संप्राप्ते उत्सुकलक्षण योगेन समागते प्रावृषिकाले किं सुला ... यात इत्यादि
ण ... यात इत्यादि किं ते इति किमपरमित्यर्थः नरो माप्तूरपुरो मणिमेखलारत्नकांचीहा
रश्च यासां तास्तथा रचितानि न्यस्तानि उचितानि योग्यानि कटकानि च प्रतीतानि खड्डुका
नीचांगुलीयकानि यासां तास्तथा विचित्रैर्वर्णैः रत्नैः विच्छित्ते ... संसिता विवस्तसितौ यासां तास्त
था ततः पदत्रयस्य कर्मधारयः तथा कुंकुमेनोद्योतिता ततः नरपाय पतने उरमणिमेखला
हार रइय उचिय कटग खड्डुय एगावलि कंठ सुत्त ... कुंकुमजुंघो स
वियाणाउत्ति पाठांतरं त उ चरपादप्राप्त नूपुर मणिमेखला हाराः तथा रचितान्युचि
तानि कटकानि च खड्डुकानि च एकावली च विचित्रमणि कृता ए कसरिका कंठसू

रजश्चासरणविशेषः त्रिसरकं च वरवलयानि च हेमसूत्रकं च संकलकं यासां तास्तथा
तथा कुंडलोद्योतितानना ते ते वरपादप्राप्तनूपुरादीनां कर्म्मधारयः तत्व त्रिवितान्यः
नासाविश्वासवातेनोह्यते यल्लघुत्वात्तत्तथा चक्षुर्हरं इत्याक्षेपकत्वात् अथवाप्र
च्छादनीयांगं दर्शनाच्चक्षुर्हरं इति धरति वा निर्वर्तयति यद्धुनत्वात्तथा वर्णस्पर्शसंयुक्तं
वर्णस्पर्शातिशायित्यर्थः हयलालायाः अश्वलालायाः सकाशात् पेलवं तिपेलवत्वेन मृदु
त्वलघुत्वलक्षणेनातिरेको तिरेकत्वं यस्य तेन तथा धवलं च तत् कनकखचितं मंडितं तं
तयोरंचलयोः कर्म्मवानलक्षणं यस्य तत्तथेति वाक्यं आकाशस्फटिकस्य सदृशीप्रभा
यस्य तत्तथा तत्त्वात्तथा अंशुकं वस्त्रविशेषं प्रवरसुकुमाल्नुत्तीहानुस्वारजोचोद्दृशाः परि
हितानि सिताद्दुकूलं वस्त्रं अथवा दुकूलो वृक्षविशेषस्तद्वल्काज्जातं दुकूलं वस्त्रविशे
ष एव तत्सुकुमालमुत्तरीयमुपरिकायाच्छादनं यासां तास्तथा सर्वर्तुकसुरभिकुसुमै
प्रवरैर्माल्यैश्च ग्रथितकुसुमैः शोभितं शिरो यासां तास्तथा एवमन्यान्यपि पदानि ब
हुवचनांतानि संस्कारणीयानि इह वर्णकहंसे हसरो वाचनांतरेः तथा चंद्रप्रभ
३३

वज्रवैडूर्यविमलदंडाः शंखकुंदकरजोमृतमथितफेनपुंजसन्निकाशाश्चत्वारश्चा
मराणि तद्वालैर्वीजितमंगं यासां तास्तथा अयमेवार्थो वाचनांतरे इत्थमधीतः सपचर
चामराहिं उद्धुव्वमाणीहिं सव्विड्ढीए त्ति छत्रादिराजचिह्नरूपया इह यावत्करणादिदं दृ
श्यं सव्वजुईए सर्वद्युत्या आभरणादिसंबंधिन्या सर्वयुक्त्या वा उचितेष्टवस्तुघटना
लक्षणया सर्वबलेन सर्वसैन्येन सर्वसमुदायेन पौरादिमिलनेन सर्वादरेण
सर्वोचितकृत्यकरणरूपेण सर्वविभूत्या सर्वसंपदा सर्वविभूषया समस्तशोभया
सर्वसंभ्रमेण प्रमोदकृतौत्सुक्येन सर्वपुष्पगंधमाल्यालंकारेण सर्वतूर्यश
ब्दसंनिनादेन महता घोषेणेत्यर्थः अल्पेष्वपि ऋद्ध्यादिषु सर्वशब्दप्रवृत्तिर्दृष्टा
अत आह महया इड्ढीए महया जुईए जुत्तिए वा महया समुदएणं महयावरतुडियज
मगसमगप्पवाइएणं यकं मे समकं युगपत एतदेव विशेषेणाह संखपण
वपडहभेरिझल्लरिखरमुहिहुडुक्कमुरवमुइंगदुंदुहिनिग्घोसनाइयरवेणं तत्र
शंखादीनां निर्घोषो महाप्रयत्नोत्पादितः शब्दो नादितं ध्वनिमात्रमे।

ज्ञाता वृत्तिः तद्रूपलक्षणो यो रवः स तथा तेन संघाटेत्यादि संघाटकादीनामयं विशेषः सिंघाटकं
३३ जलजफलविशेषः तदाकृतिपथयुक्तं स्थानं सिंघाटकं त्रिपथयुक्तं त्रिकं त्रिकं चतुष्पथ
युक्तं चतुष्कं त्रिपथभेदि चत्वरं चतुर्मुखं देवकुलादि महापथो राजमार्गः पथः पथमा
त्रं तथा आसित्तसित्तेगंधोदकेनोपसिक्तं संमृष्टमिति संसिक्तं तन्यथा शुचिकं पवित्रं समा
र्जितमपहृतमपहृतकचवरं उपलिप्तं गोमयादिना यत्तत्तथा यावत्करणात् उपस्थानशाला
वर्णक पूर्वोक्त एव वाच्यः एवंभूतं नगरमवलोकयन्त्यो गच्छंतीति ताकीयन्ते ततो नानालता
सहकारादि लताः सहकारादयो वृक्षाः सहकारादयः गुल्मा वंशीप्रभृतयः वल्ल्यस्त्रपु
ष्यादिकाः एतासां ये गुच्छाः पल्लवसमूहाः ते यत्र उच्छ्रिते येति अवकारितं वै भारगि
रेर्ये कटकाः देशास्तेषां ये पादाः अधोभागाः तेषां मूले समीपे तत्तथा तत्सर्वतः
समंतात् आहिंडमाणित्ति आहिंडमाने २ नेनवे मुक्तने त्यतिकर नामं सामान्ये नस्त्री
णं प्रसंशाधारणात्त्वविषयो कालमेघादोहदो धारिण्याः प्रादुरभूत् इत्युक्तवाचना
न्तरे तु उज्जोएमाणीउ दोहलं विणिंति विणिंति विनयंत्यपनयंतीत्यर्थः तं जति णं
अहमवि मेहेसु अब्भुग्गएसु जाव डोहलं विणिज्जामि विपनयेयमित्यर्थः संगत ३३

आयं पाठ इति उक्तदोहदप्राप्तौ यस्याः संपन्नं तदाह तएणमित्यादि अविणिज्जमाणंसित्ति
दोहदे अविनीयमाने सति संप्राप्तदोहदा मेघादीनामजातत्वात् असंपूर्णदोहदा तेषाम
जातत्वेनैवासंपूर्णत्वात् अत एव असन्मानीयं अपनीयमाने सति असंप्राप्तदोहदा
मेघादीनामजातत्वात् असंपूर्णदोहदा तेषामनुभवनादिति ततः शुष्का मनस्तापे
न शोणितशोषात् भुक्खत्ति बुभुक्षाक्रांतेव अत एव निर्मांसा ओलुग्गत्ति अवरुग्णा जी
र्णेव कपमित्याह उलुग्गत्ति अवरुग्णमिव जीर्णमिव शरीरं यस्याः सा तथा अथवा अ
वरुग्णत्वेन स्नानाद्यवरुग्णशरीरा तथैव प्रमलिनदुर्बला स्नानभोजनत्यागात् कांतलाव
नी सूताउमंथियत्ति अधोमुखीकृतं वदनं नयनकमले च यया सा तथा पांडुकि
कितमुखी हीनास्यच विवर्णवदनं यस्याः सा तथा करतलमलीय दिकारसख्यादिभिः
तल्किंपांचपरिहायमाना दीनादुस्थमनो यस्याः सा तथा यनोनिरानंदा उपहतो मनसः संक
ल्पो युक्तायुक्तविवेचनं यस्याः सा तथा यावत्करणात् करतलपल्हत्थमुही अट्टज्झाणे
चगयाझियातित्ति आर्त्तध्यानं ध्यायतीति नो आढाइत्ति नाद्रियते नादरं करोति नो

ज्ञा॰ टी॰ नोपरिजानाति तेन प्रत्यसिजानात्ति विचित्रत्वात् संसत्ताउत्ति आकुलीभूताः शीघ्र
३४ मित्यादीति चत्वार्थैकार्थिकानि अतिसंसमोपदर्शनार्थं जेणेवेत्यादि यत्र धारिणी
देवीतत्रोपागच्छतीत्यागत्य नावल्गुतादि विशेषणां धारिणी देवी पश्यति वचनांतरेतु
जेणेव धारिणी देवी तेणेवेत्यतः परं तेहिं गमणेहिं इत्येवं दृश्यते तत्र परिहत्थं प्रधा
रितेनान्विकल्पितयानित्यर्थः गमनायगमनार्थं तथा तएणं से सेणिए राया जेणेव धारि
णीदेवी तेणामेव उवागच्छइ २ पासइत्ति पश्यति सामान्येनो वल्गुतादि विशेषणं पश्य
तीति देव्वापि सव्वंपित्ति द्वितीयामपि वारमिति गम्यते सबहुमाणं वियंत्ति शापथान्
हृत्यगुरुप्रोत्हिकासविष्यसित्वं यदि विकल्पना प्याओसीत्यादिकान् वाक्यविशेषान्
आचिताश्रोत्रेणोपजं सिताश्चपर्यैर्वा आविताशपथशाविता वासीकिरोति विणह
किणमिति वा पाठांतरे देवानुप्रिये एतस्यार्थस्यातहंश्रवणतायां मणोमाणसियं
ति मनसि जातं मानसिकं मनस्येव पद्वर्त्तते मानसिकं दुःखं वचनेनाप्रकाशितत्वा
[illegible]मानसिकारहस्सीकरोषि जोपयसीत्यर्थः तिण्णिमित्यादि त्रिषु मासेषु बहु ३४

पडिपुण्णाणंति इषद्भृतेषु जत्थेहंमिति यत्ति यो कश्चित्करिष्यामीति पाठः अयमे
वारूवत्ति आत्मेवरूपस्य मणोहरसंपत्तीति मनोरथप्रधाना प्राप्तिर्यथा चिंति
तेत्यर्थः आर्यैर्जसंपरिपिलिताय [illegible]नामुपादेरइत्ति इत्यादिकारणैः आयंवा उपाहृत्य
इत्यादिइवाक्षिति वा स्थिरतां यापित्वार्थस्य पाठान्तरे उत्पत्तिया तस्येवेत्यर्थः अज्झत्थिएत्ति
त्ति आजतमानः अयमेयारूवेत्ति अइमेतद्रूपः आध्यात्मिकः आत्मानस्यः चिंतितः
स्मरणरूपः प्रार्थितो लब्धुमाशंसितः मनोगतः अनहिः प्रकाशितः संकल्पो विक
ल्पः संपेहेतित्ति संप्रेक्षते पर्यालोचयति ताउत्ति इत्यादेस्यामंत्रणं एयंकारणंत्ति अपध्या
नहेतुं दोहदापूर्तिलक्षणमितिभावः कारणमिति कचिन्ताधीयतएव अग्गहमाणेत्ति
अगोपायेत आकारसंवरेण अशंकमाना विवक्षितप्राप्तौ स्वेदेहमविहायानः अनि
न्दुवानां अनपलपंतः किमुक्तं तव त्यप्रच्छादयंतः यथा भूतं यथावृत्तं अवितथं नत्वय
थाभूतं असंदिग्धमसंदेहं एयमहंति प्रयोजनं दोहदपूरणमिति भावः अंतगमणं गमि
ष्यामित्ति दावगमनं करिष्यामीति वुल्लमाउयाएत्ति लघुमातुः पुव्वसंगइयत्ति पूर्वका

तंगति

कालेऽमित्रत्वं येन स तथा पूर्वसंगतिकः। महर्द्धिको विमानपरिवारादिसंपदुपेतत्वात्। महाद्युतिकः
शरीराभरणादिदीप्तियोगात्। महानुभागो वैक्रियकरणशक्ति
युक्तत्वात्। महायशाः सत्कीर्त्तियोगात्। महाबलः पर्वताद्युत्पाटनसामर्थ्योपेतत्वात्। म
हासौख्यो विशिष्टसुखयोगात् दिति। पोसह सालाए त्ति। पोषधपर्वादिनामनुष्ठानमुपवासादि
तस्य शाला गृह विशेषः पोषधशाला। यस्यां पोषधिकस्य कृतोपवासादेः अपगतमालाव
र्णकविलेपनस्य वर्णकं चंदनं। तथा निक्षिप्तं विमुक्तं शस्त्रं छुरिकादि मुशलं च येन स तथा
तस्य एकस्यांतरं असहायादि मनुष्यवियोगात् अद्वितीयस्य तथाविधपदात्यादिसहायवि
रहात्। अट्ठमभत्तंति समयभाषयोपवासत्रयमुच्यते। अट्ठमभत्ते परिणममाणे त्ति पूर्य
माणे परिपूर्णप्राय इत्यर्थः। वेउव्वियसमुग्घाएणमित्यादि। वैक्रियसमुद्घातो वैक्रियकार
णार्थो जीवव्यापारविशेषः तेन समुपहन्यते समुपहतो भवति समुपहंति बाक्षिपति प्र
देशानिति गम्यते व्यापारविशेषपरिणतो भवतीति भावः। तत्स्वरूपमिति भावः। त
त्स्वरूपमेवाह। संखेज्जाइं इत्यादि दंडं ऊर्ध्वाधआयतं शरीरबाह्ये जीवप्रदेशकर्मपुद्
लसमूहं तत्र च विविधपुद्गलानादत्ते इति दर्शयन्नाह। तं यथा रत्नानां कर्केतनादी
नां संबंधीन १ तथा वैराणं २ वैडूर्याणं ३ लोहिताक्षाणं ४ मसारगल्लानां ५ हंसगर्भाणं

६ पुलकाणं ७ सोगंधिकाणं ८ ज्योतीरसानां ९ अंकानां १० अंजनानां ११ रजतानां १२ जातरूपाणां
१३ अंजनपुलकानां १४ स्फुटिकानां १५ रिष्टानां १६ किमत आह यथाबादरान् असारान् यथासू
क्ष्मान् सारान् ततो वैक्रियं करोतीति त्ति अभयकुमारमणुकंपमाणे त्ति अनुकंपयन् हात
स्याष्टमोपवासरूपं कष्टं वर्त्तत इति विकल्पयन्नित्यर्थः सर्वजन्मनिजनिता जाताया स्नेहप्री
तिः प्रियत्वं न कार्यवशादित्यर्थः बहुमानश्च गुणानुरागः ताभ्यां सकाशात् जातः शोकः चि
त्तखेदो विरहसद्भावेन यस्य सः पूर्वभवजनितस्नेहप्रीतिबहुमानजातशोकः वाचनान्तरे
पूर्वभवजनितप्रीतिबहुमानजनितप्रीतिस्तत्रशोकापुलकादिरूपा तस्मात्तच कीयात्।
विमानवरपुंडरीकात् पुंडरीकता च विमानानां मध्ये उत्तमत्वात् रयणुत्तमाउत्तिरन्तो त्ति क्रा
मात् रचनोत्क्रमात् वा धरणितलगमनाय त्वरतप्रापयेत्वरितः शीघ्रसंजनितउत्पादितो ग
मनप्रचारो गतिक्रियाप्रवृत्तिर्येन स तथा वाचनांतरे धरणितलगमनसंजनितमनःप्र
चार इति प्रतीतमेव आमूर्लिताति दोलायमानानि यानि विमलानि कस्यप्रतरकाणि
च प्रतरवृत्तरूपाणि आभरणानि अवतंसकेव कर्णपूरे मुकुटं च मौलिः तेषामु

त्कटो य आटोपः स्फारता तेन दर्शनीयः आटोपदर्शनीयः स तथा तथा अनेकेषां म
णिकनकरत्नानां पहकरत्ति निकरस्तेन परिमंडितौ भक्तिचित्रौ विनिपुणकेन कृतौ निवेशि
तौ मणिकृत्तिमकारस्य मामलनशैली प्रसवत्वात् यो तु रूपो गुणः कटिसूत्रं तेन जनितो हर्षो यस्य
स तथा प्रेंखोलमाना आंदोलायमाना याभ्यां चरं ललितं कुंडलाभ्यां मयुज्वलितं मुज्वलीकृतं
वदनं मुखं तस्य यो गुणः कांतिलक्षणः तेन जनितं सौम्यरूपं यस्य स तथा वाचनांतरे पुनरेवं वि
शेषणत्रयं दृश्यते वाघरिय विमलकणगपयरगवडंसगपकंपमाणचलक्कोजलियपरि
लंबमाण नरमगरतुरगमुहसयविणिग्गउग्गिन्न पवरमोत्तियविरायमाण मउडुक्कडाडोवसणि
ड्डो तत्र घृणि तानि चंचलानि विमलकनकप्रतरकाणि च अर्वतंसकेच प्रकंपमाने चल
त्वोलान्यतिचपलानि ललितानि शोभावंति परिलंबमानानि नरमकरतुरगमुखशतेभ्यो
मुकुटाग्रविनिर्मितैर्नस्मुखाकृतिभ्यो विनिर्गतानि निःसृतानि उद्गीर्णनीव वांतानी
वोद्गीर्णानि यानि प्रवरमौक्तिकानि वरमुक्ताफलानि तैर्विराजमानं शोभमानं यन्मुकुटं तद्यो
तितं द्रक्षलिष्य यद्दुत्कटआटोपस्तेन दर्शनीयो यः स तथा अणेगमणिकणगरयणपरि
मंडियभागनत्तिचित्तविणिउत्तगमणगुणजणियपंखोलमाणवरजलियकुंडलुज्जलि
य आननरणजणियसोभो अनेकमणिकनकरत्नानि करपरिमंडितभागे भक्तिवि ३६

चित्रे विच्छित्तिविचित्ते विनियुक्ते कर्णयोर्निवेशिते गमनगुणेन गतिसामर्थ्येन जनिते कृते
प्रेंखोलमाने चंचले ये वरललितकुंडले ताभ्यामुज्वलिते नउद्दीपनेनाधिकस्याभासरणेन यो
उज्वलिताधिकाभ्यां उज्वलिताधिके चाभासरणे च कुंडलव्यतिरिक्ते जनिता शोभा यस्य स
तथा तथा गयजलमजविनलदंसणविरायमाणरूवो मतजमलं विगतमालिन्यं विम
लं दर्शनमाकारो यस्य स तथा अत एव विराजमानं रूपं यस्य स तथा ततः कर्मधारयः
अथ मनेवोपमीयते उदित इव कौमुदीनिशायां कार्त्तिकपौर्णमास्यां शनैश्चरांगारकयोः
प्रतीतयोः प्रज्वलितः दीप्यमानः सन् यो मध्यभागे तिष्ठति स तथा नयनानंदो लोचना
ह्लादकः शरच्चंद्र इति शनैश्चरांगारकवत् कुंडले चंद्रवत्तस्य रूपमिति तथा यमेवमेरूणे
पमीयते तथा दिव्यौषधीनां प्रज्वलनेनेव मुकुमुकुटादितेजसा उज्वलितं यद्दर्शनं रूपं
तेनाभिरामो रम्याकारः स तथा ऋतुलक्ष्म्येव सर्वर्त्तुकुसुमसंपदा समस्ता सर्वा समस्तस्य
वा जाता शोभा यस्य स तथा प्रकृष्टेन गंधेनोद्धूतो नोद्धूलेनाभिरामो यः स तथा मेरुरिव
नगवरः विकुर्वित विचित्रवेषः भासौ वर्त्तत इति दीवसमुद्दाणंति द्वीपसमुद्राणां

असंख्यपरिमाणनामधि[illegible]धाणं त्ति असंखपरिमाणनामधेयानि च येषां ते तथा ते
षां मध्यकारेण मध्यभागेन वियवयमाणो त्ति व्यतिव्रजत् उद्योतयन् शुभ्रतया विमलया
जीवलोकं उवयइ त्ति अवपतति अंतर त्ति अंतरिक्षप्रतिपन्नः आकाशस्थः
दशार्द्धवर्णानि पंचवर्णानि सकिंकिणिकानि क्षुद्रघंटिकोपेतानि एकस्तावदेषगः
पाठो अन्योपि द्वितीयो गमो वाचनाविशेषः पुस्तकान्तरेषु दृश्यते ताए तया उत्कृष्टया
गत्या त्वरितया आकुलया न स्वभावविक्रया अंतरालकृततोष्ये सवत्याइ त्ति आह च
पलया कायतोपि चंडया रौद्रया गत्युत्कर्षयोगेन सिंहयात दर्द्धशीघ्रेयेण उद्धतया द
र्पातिशयेन जयिन्या विपक्षजेतृत्वेन छेकया निपुणया दिव्यदेवगत्या अयं च द्वि
यो गमो जीवाभिगमसूत्रवृत्त्यनुसारेण लिखितः॥ किं करेमि त्ति किमहं करोमि तव
दत्तिप्रेतं कार्यं किं वा दलयामि त्ति दत्तं ददामि किं वा प्रयच्छामि तव संमताय अन्य
स्मै किं वा ते हृदयेप्सितं मनोवांछितं प्रवर्त्तते इति प्रश्नः सुणिहुयवीसत्थे त्ति मुहु
निर्वृत्तः स्वस्थः आविश्वासवान् निरुत्सुको वायः स तथा उत्ति इत्तात परिकप्पे इत्ति
सन्नाहयतं कुरुत अंतो अंतेउरंसि त्ति अभ्यंतरतः पुरस्य महया भडबडगरवंदपरि ३७

क्खित्ते त्ति महत्तराणां यच्चेटकरप्रधानं चिउद्दप्रधानं वृंदं तेन संपरिक्षिप्ता वेभार
गिरेः कटकतटानि तदेकदेशतटानि पादाश्च तटासन्नलघुपर्वतास्तेषां यन्मूलं तत्र
तथा आरामेषु आरमंति येषु माधवीलतागृहादिषु दंपत्यानि ते आरामास्तेषु पु
ष्पादिमद्वृक्षसंकुलानि उत्सवादौ बहुजनसोग्यानि उद्यानानि येषु तथा सामान्यवृ
क्षवृंदयुतानि नगरासन्नानि काननानि तेषु च नगरविप्रकृष्टानि वनानि तेषु च
तथा वनखंडेषु च वैजातीयवृक्षसमूहेषु चैकैकेषु गच्छेषु च वृन्ताकीप्रभृतिषु गुल्मे
षु च वंशजालिप्रभृतिषु लतासु च सहकारलतादिषु वल्लिषु च नागवल्ल्यादि
षु कंदरासु च गुहासु दरीसु च शृगालादिउत्कीर्णभूमिविशेषेषु चुण्डीस्वपत्ति
अखातास्वोदकविदारिकापृथेवानराहिसंबंधिषु पाठान्तरेण दूरेषु कच्छेषु च गह
नेषु नदीषु च सरित्संगमेषु च नदीमिलकेषु विवरेषु च जलस्थानविशेषेषु
अच्छमाणीयत्ति तिष्ठंति प्रेक्षमाणा च पश्यंतीदृशवस्तूनि मज्जंति वस्तानी प
ल्लवाणियत्ति पल्लवान् किशलयानि माणेमाणीयत्ति मानयंती स्पर्शनद्वारे

ण विलयमाणीयत्ति दोहलं विनयंतीतंसि अकालदोहलंसि विणीयंसित्ति ॥ त्ति इंति
मानयंति स्पर्शनद्वारेण विसोयमाणीयत्ति दोहलं विनयंती तिंसि अकालदोहलं
सि विणीयंसित्ति अकालमेघदोहदे विनीते सति संमानितदोहदा पूर्णदोहदेत्यर्थः
जयंचिट्ठइत्ति यतनया यथा गर्भबाधनभवति तथा तिष्ठति ॥ ऊर्द्धस्थानेन ॥
आसयइत्ति आस्ते आश्रयति वा आसनं चपि ति वेति हितमेधायुरादिवृद्धि
कारणत्वात् मितं तस्मिं द्रियानुकूलत्वात् पथ्यमरोगकारणत्वात् ॥ णाइचिंतितं
ति अतीव चिंता यस्मिंस्तदतिचिंतं ॥ नातिचिंतं यथा भवति एवं गर्भपरिव
हतीति संबंधः ॥ नातिशोकं नातिदैन्यं नातिमोहं नातिकामासक्तिं नातयं एत
देव संग्रहवचनेनाह ॥ व्यपगतेत्यादि तत्र भयं त्रासो तिमात्रं परित्रासो कस्मात्कु
तुषु कथं सुखमानाः सुखायोत ऋतुतः ज्यमानं सुखी स्ते ॥ भ छ य जोयाउत्ति ॥
धोतमुखाकरोति अपनीतसमस्त्वादस्त्यर्थः ॥ पोत्रातुपुत्रिकां पुत्रपौत्रादियो
ग्यामित्यर्थः ॥ इत्ति जीविकां कल्पयतीति रायगिहं नगरं आसियपइयावत्क
रणात्रिदेवं द्रष्टव्यं ॥ आसियसंपक्षिउपलित आसित्ति सुद्दकघटेन संमार्जिते ३९

कचवरशोधनेन उपलित्तं गोमयादिना केषुसिंघाडकत्तिगचउक्कचत्तरचतुर्मुखम
हापहपहेसु तथा सित्तसुइयसमट्ठरत्थंतरावणवीहियं सित्तानि जलेनातएव शु
चीनि पवित्राणि संमृष्टानि कचवरापनयनेन रथ्यांतराणि आपणवीथयश्च ह
ट्टमार्गा यस्मिन् तत्तथा मंचातिमंचकलितं मंचा मालकाः प्रेक्षणकद्रष्टृजनो
पवेशननिमित्तं अतितिमंचास्तेषामप्युपरि ये तैः कलितं नाणाविहरागऊसि
यझयपडागमंडियं नानाविधरागे कुसुंभादिभिरूषिता ये ध्वजाः पताकाः सिंह
गरुडादिरूपकोपलक्षितबृहत्पटरूपाः पताकाश्च तदितरास्ताभिर्मंडितं लाउ
उल्लोइयमहियं लाइयं छगणादिना भूमौ लेपनं उल्लोइयं सेढिकादिना कुड्या
दिषु धवलनं ताभ्यां महितं पूजितं तेणेव चामहितं पूजनं यत्र तत्तथा गोसीस
सरससरत्तचंदणदद्दरदिन्नपंचंगुलितलं गोशीर्षस्य चंदनविशेषस्य सरसस्य च
रक्तचंदनविशेषस्य च दर्दरेण चपेटारूपेण दत्ता न्यस्ताः पंचांगुलयस्तला हस्त
या यस्मिन् तत्कुड्यादिषु तत्तथा उवचियवंदणकलस उपचिताः गृहांतः कृतचतुष्क
पुचंदनकलशा मंगल्यघटा यत्र तत्तथा वंदणघडसुकयतोरणपडिदुवारदेस

ज्ञा.क.वृत्तिः दिण्णं चंदनघटाः सुकृता तोरणानि च प्रतिद्वारदेशभागेषु यत्र तत्तथा आसत्तो
३९ सत्तविपुलवट्टवग्घारियमल्लदामकलावं आसत्तं चंदनेन घटाः सुजावं आसत्तोत्सक्त
मिलग्नः उत्सक्तश्च उपरि लग्नो विपुलो वृत्तो वग्घारितप्रलंबो माल्यदाम्नां पुष्पमा
लानां कलापसमूहो यत्र तत्तथा पंचवन्नसरससुरहिमुक्कपुप्फपुंजोवयारक
लितं पंचवर्णाः सरसाः सुरसयो ये मुक्ता करप्रेरिताः पुष्पपुंजास्तैर्य उपचारः
पूजा स्वरूपस्तेन कलितं कालागरुपवरकुंदुरुक्कधूपदग्धेन मघमघेंतगंधुद्धुयाभि
रामं कुंदुरुक्कं चीडा तुरुक्कं सिल्हकं सुगंधवरगंधियं गंधवट्टिभूयं नडनट्टगजल्ल
मल्लमुट्ठियवेलंबकहगपवगलासगआइक्खगलंखमंखतूणइल्लतुंबवी
णियअणेगतालायराणुपरिगीयं तत्र नटा नाटकानां नाटयितारः नर्त्तका ये
नृत्यंति अंकेल्लाइत्येके जल्ला वरत्राखेलकाः विडूषकाः कथाकथकाः प्र
तीताः प्लवकाः ये राजस्तोत्रपाठका इत्यन्ये मल्लाः प्रतीता मौष्टिका मल्ला एव ये
मुष्टिभिः प्रहरंति विडंबकाः विदूषकाः कथाकथकाः प्रतीताः प्लवकाः ये उ ३९

त्प्लवंते नद्यादिकं वा तरंतीति लासकाः ये रासकान् गायंति जयशब्दप्रयोक्तारो वा
भांडा इत्यर्थः आख्यायका ये शुभाशुभमाख्यायंति लंखा वंशखेलकाः मंखाः
चित्रफलकहस्ताः भिक्षाकाः तूणा भिधान वाद्यविशेषवंतः तुंबवीणिकाः वी
णावादकाः अनेके ये तालवराः तालादानेन प्रेक्षाकारिणस्तेषां परिसमंतात् गी
तं ध्वनितं यत्र तत्तथा कुरुत स्वयं कारयत अन्यैस्तथा चारकशोधनं कुरुत कृत्वा
च मानोन्मानवर्धनं कुरुत तत्र मानं सेतिकादि उन्मानं तुल्यमानं कर्षादिकं श्र
ण्यः कुंभकारादिजातयः अष्टादश ता यस्ता एवेदृशा उस्सुकमित्यादि उच्छुल्को मु
क्तशुल्कां स्थितिपतितां कुरुत इति संबंधः उक्कं तु विक्रेतव्यं भांड प्रति
देयं राजदेयं द्रव्यं उक्करा मुक्तकरां करस्तु गवादीनां प्रतिवर्षं राजदेयं द्रव्यं अवि
द्यमानो भटानां राजपुरुषाणां आज्ञादायिनां प्रवेशः कुटुंबिमंदिरेषु यस्यां सा तथा
तामभटप्रवेशां दंडेनेति निर्वृत्तं दंडिमं कुदंडेन निर्वृत्तं कुदंडिमं राजद्रव्यं तन्ना
स्ति यस्यां सा तथा तामदंडिमकुदंडिमां अपराधानुसारेण राजग्राह्यं द्रव्यं कुदंडस्तु

ज्ञाता वृत्तिः ॥४०॥

कारणिकानां प्रज्ञापराध्य ऋद्धस्य पपराधे स्य राजग्राह्यं द्रव्यं अविद्यमानं धरिमं ति ऋण
द्रव्यं यस्यां सा तथा तां अविद्यमानो धारणीयोऽधमर्णो यस्यां सा तथा तां अणुद्धुयमुइंग
ति अनुद्धूता आनुरूप्येण वादनार्थमुत्क्षिप्ता अनुद्धूता वा वादनार्थमेव वादकैरत्यक्ता
मृदंगा मर्दला यस्यां सा तथा तां अम्लायमल्लदामं ति अम्लानपुष्पमालां गणिकाव
रैर्विलासिनीप्रधानैर्नाटकीयैर्नाटकप्रतिबद्धपात्रैः कलिता या सा तथा तां अ
नेकतालाचरानुचरितां प्रेक्षाकारिविशेषासेवितां प्रमुदितैः हृष्टैः प्रक्रीडितुमारब्धैः
र्जनैर्रतिता या सा तथा तां यथार्हां यथोचितां स्थितिपतितां स्थितौ कुलमर्यादा
यां पतितां तत्सूता यां प्रक्रियापुत्रजन्मोत्सवसंबंधिनी सा स्थितिपतिता ॥ वाचनांतरे द
सदेवसियं ठिइपडियं ति ॥ तत्र दशाहिकं दशदिनमानमित्यर्थः ॥ कुरुत कारयत च सइएहि
तिशतपरिमाणैर्दाएहिं ति दानैः ॥ वाचनान्तरे सतेकांश्चेत्यादि योगान् देवपूजाः दायान्
दानानि । भागान् लब्धद्रव्यविभागानिति प्रथमे दिवसे जातकर्म प्रसवकर्म नालच्छेदा
नादिकं द्वितीये दिने जागरिकां रात्रिजागरणं । तृतीये चंद्रसूर्यदर्शन उत्सव एतद् इति ॥ ॥४०॥

पाठान्तरे तु प्रथमदिवसे स्थितिपतितां तृतीये चंद्रसूर्यदर्शनिकां षष्ठे जागरिकां नि
वृत्ते असुइजायकम्मकरणे त्ति निवृत्ते अतिक्रान्ते अशुचीनां जातकर्मणां करणे निव
त्ते सुइजायकम्मकरणे त्ति पाठांतरं तत्र निर्वृत्ते शुचीनां जातकर्मणां करणे बारसाहदि
वसे त्ति द्वादशाख्ये दिवसे इत्यर्थः अथवा द्वादशानामह्नां समाहारो द्वादशाहं तस्य दिवसो
येन द्वादशाहः पूर्यते तत्र तथा मित्र ज्ञाति स्वहृदः ज्ञातयो मातापित्रादयः निजकाः स्वकी
याः पुत्रादयः स्वजनाः पितृव्यादयः संबंधिनः श्वशुरपुत्रश्वशुरादयः परिजनो दासीदासादि
बलं सैन्यं गणनायकादयस्तु प्रागभिहिताः मइ इ महालय त्ति अतिमहति आस्वादयंता वा
स्वादयंता वास्वादनीयं परिभाजयंता वन्येभ्यो यच्छन्तो मातापितराविति क्रमः जिमिय त्ति ।
जिमितो भुक्तुत्तरत्ति भुक्तोत्तरकालं आगय त्ति आगतो उपवेशनस्थाने तिइति गम्य
ते समाणे त्ति संतो किंभूतो भूत्वेत्याह आचान्तो शुद्धोदकयोगेन चोक्षो लेपसिक्थाद्यप
नयनेन अत एव परमशुचिभूताविति अयमेयारूवे त्ति इदमेतद्रूपं गोणं गौणं गुण
निष्पन्नं नामधेयं प्रशस्तं नामधेय इति क्षीरधात्र्या स्तन्यदायिन्या मंडनधात्र्या मंडि

ज्ञातावृत्ति। ॥४१॥

कया मज्जनधात्र्या स्नापिकया क्रीडनधात्र्या क्रीडाकारिण्या अंकधात्र्या उत्संगस्थापि
पिकया कुब्जिकाभिः चिक्कजंघाभिः चिलातीभिरनार्यदेशोत्पन्नाभिर्वामनाभिर्वामन
ईस्वशरीराभिर्वटभाभिर्मटहकोष्ठाभिर्बर्बरीभिः बर्बरदेशसंभवाभिः बकुशिकाभिः
योनकाभिः पल्हविकाभिः ईसनिकाभिः घोरुकिनिकाभिः लासिकाभिः लकुसिकाभिः
द्रविडीभिः सिंहलीभिः आरवीभिः पुलिंद्रीभिः पक्कणीभिः बहलीभिः मुरुंडीभिः पा
रसीभिः नानादेशीभिर्बहुविधानार्यप्रायदेशोत्पन्नाभिरित्यर्थः विदेशस्तदीयदेशापे
क्षया राजगृहनगरदेशस्तस्य परिमंडिकाभिः इंगितेन नयनादिचेष्टाविशेषेण चिंतितं
च परेण हृदि स्थापितं प्रार्थितं चाभिलषितं च विजानंति यास्तास्तथा ताभिः स्वदेशे य
न्नेपथ्यं परिधानादिरचना तद्गृहीतो वेषो याभिस्तास्तथा ताभिर्निपुणनामध्येकु
शलाभिस्तथा ताभिः अत एव विनीताभिर्युक्त इति गम्यते तथा चेटिकाचक्रवालेन
अपि च स्वदेशसंभवेन वर्षधराणां वर्द्धितकविप्पन्नप्रयोगेण नपुंसकीकृतानामंतःपुरम
हत्तरकाणां कंचुइज्जत्ति कंचुकिनामंतःपुरप्रयोजननिवेदकानां प्रतिहाराणां वा महत्त
रकाणां चांतःपुरकार्यचिंतकानां वृंदेन परिक्षिप्तो यः स तथा हस्ताद्धस्तं हस्तांतरं संहृ ॥४१॥

यमाणः अंकादंकमुत्संगांतरं परिभोज्यमानः परिगीयमानः तथाविधबालोचितगीतवि
शेषैः उपलाल्यमानः क्रीडादिलालनया पाठांतरे उवणच्चिज्जमाणे २ उवगाइज्जमाणे २
उवलालिज्जमाणे २ उवगूहिज्जमाणे २ आलिंग्यमान इत्यर्थः अवयासिज्जमाणे २ कर्पंचि
दालिग्यमान एव परियंदिज्जमाणे २ स्तूयमान इत्यर्थः परिचुंबिज्जमाणे २ इति प्रचुंब्यमा
नः चंक्रम्यमाणः निर्वातनिर्घाते गिरिकंदरेत्ति गिरिनिकुंजे आलीन इव चंपकपादपः सु
खंसुखेन वर्द्धते स्मेति प्रचंक्रमणकं समलं चूडोपनयनं मुंडनं महयाइड्डीसक्कारसमुद
एणं ति महत्या ऋद्ध्या एवं सत्कारेण पूजया समुदयेन च जनानामित्यर्थः अपर्थत इति व्या
ख्यानतः करणतः प्रयोगतः सेहावेत्ति सेधयति निष्पादयति शिक्षयत्यभ्यासं कार
यति एवं गमुत्तपडिबोहिएत्ति नवांगानि द्वे द्वे श्रोत्रे नयने नासिके जिह्वैका त्व
गेका मनश्चैकं सुप्तानि बाल्यादव्यक्तचेतनानि प्रतिबोधितानि यौवनेन व्यक्तचेत
नावंति कृतानि यस्य स तथा आह च ववहारतापे सोत्ताइणवसुत्ता इत्यादि अ
ष्टादशविधिप्रकाराः प्रकाराः अष्टादशलिपिविधिस्तेषु प्रचारप्रवृत्तिर्यस्यासात

थानस्य देशीसाबायां देशान्तरेन वर्णबलीरूपायां विशारदः पंडितो यः स तथा गीतरत्ति
र्गंधर्वे गीते नाद्ये च कुशलः॥ हयेन युध्यत इति हयप्रयोधी॥ बाहुल्यां पुमद्धाती ति॥ बाहुप्रम
दा साहसिकत्वाद्धिकाले चरतीति विकालचारी॥ प्रासाद पर्वेसएति अवतंसकाइ बावतं
सका शिखर रवरः प्रासादाश्च ते वतंसकाश्च प्रासादावतंसकाः प्रधान प्रासादा इत्यर्थः॥
अस्मग्रमुसियत्ति अत्युद्गतो न्नतान् अत्युच्चानित्यर्थः॥ अत्र चेद्वितीया बहुवचन लो
पो दृश्यः॥ पहसिए चेव त्तिः प्रहसितानि व श्वेत प्रतापटल प्रबलतया हसन्त इवेत्यर्थः॥ न
थामणि कनकरत्नानां स र्क्ति विछि सित्ति भ्रि त्राये तेन तथा वातोद्धूताः विजय स्तविका
वैजयंत्य प्रति पताकाः॥ पताकाः छत्रातिछत्राणि च नैः कलितास्ते तथा ततः कर्म्मधा
रयस्त नस्तान् तुंगान् गगनमिव गगन तलम भिलंघयच्छिखरान्॥ जालंतरयण पंजरु
म्मिल्लिय वत्ति जालान्तरेषु मत्तालंब पर्यंतेषु जालान्तरेषु वा जालकमध्येषु रत्ना
नि येषां ते तथा ततो द्वितीया बहुवचन लोपो दृश्यः॥ पंजरोन्मीलितानि व पृथक्
कृत पंजराणि व प्रत्यग्रछायानीत्यर्थः अथ वा जालांतर रत्न पंजरेन समुदय विशो

षे रुन्मीलितानि वोन्मिषित लोचनानि वेत्यर्थः मणिकन वस्तूपिकागीति प्रतीतं वि
कसितानि सित पत्राणि पुंडरीकानि च प्रतिरूपापेक्षया साक्षाद्वा येषु ते तथा तानि ति
लकैः पुंड्रैः रत्नैः कर्केतनादिभिः अर्द्धचंद्रे सोपान विशेषैः भित्तिषु वा चंदनादिमये
राजेत्थैः अर्चिताये ते तथा तान् पाठान्तरेण तिलकरत्नार्द्धचंद्रचित्रान् नानामणि
मय दामालंकृतान् अंतर्बहिश्च श्लक्ष्णान् मसृणानि रूपाणि रूपकाणि येषु ते
तथा तान् प्रसादीयान् चित्ताह्लादकान् दर्शनीयान् यान् पश्यच्चक्षुर्न विश्राम्यति अ
तिरूपान् मनोज्ञान् द्रष्टारं द्रष्टारं प्रति रूपं येषां ते तथा तान् एकं महद्भवनमिति अथ
भवन प्रासादयोः को विशेष इति उच्यते भवनमायामापेक्षया किंचिन्न्यूनो छ्रयमा
नं भवति प्रासादस्तु आयामद्विगुणोछ्रय मिति अनेकेषु स्तंभशतेषु सन्निविष्टं यत्त
तथा लीलया स्थिताः शालभंजिका पुत्रिका यस्मिन्नत्त तथा अत्युद्गतस्तूता वद्दू
स्य वेदिका द्वार मुंडिको परि वेदिका तोरणं च यत्र तत्तथा वराभिः रविती सीरतिदा
त्तिर्वा शालभंजिका भिरसुश्लिष्टाः संबद्धा विशिष्टा लष्टाः संस्थिताः प्रशस्ताः वैडू

र्यस्य स्तंभा यत्र तत्तथा नानामणिकनकरत्नैः खचितं उज्ज्वलं च यत्तत्तथा ॥ ततः पद
त्रयस्य कर्मधारयः ॥ वज्रसमनलि अतिसमश्लक्ष्णविस्तीर्णनिश्छिद्रे रमणीयश्च कुट्टिमो यत्र
तत्तथा ॥ ईहामृगऋषभतुरगनरमकरविहगव्यालकिंनररुरुसरभचमरकुंजरवन
लतापद्मलताभक्तिचित्रमिति या वस्तुरचनं तथा स्तंभोपरिवर्तिन्या वज्रस्य वेदि
कया परिगृहीतं परिवेष्टितमभिरामं च यत्तत्तथा विद्याधरयमलयुगलयंत्रयुक्तमिव
ति विद्याधरयोर्यत् यमलं समश्रेणिकं युगलं द्वन्द्वं तेनेव यंत्रेण संचारिपुरुषप्रति
मा द्वयरूपेण युक्तं यत्तत्तथा आर्षत्वाच्चैवंविधसमास इति तथा अर्चिषां किर
णानां सहस्रैर्मालनीयं परिवारणीयं ति सभीणं दिप्पमाणं तिभिसमाणं ति अतिश
येन दीप्यमानं चक्षुः कर्त्तलोकने अवलोकने दर्शने सति लिसतीव दर्शनीयत्वा
तिशायित्वात्त्विपोतिति च यत्र तत्तथा नानाविधाभिः पंचवर्णाभिः घंटाभिः प्रधानप
ताकाभिः परिमंडितमग्रशिखरं यस्य स तथा धवलमरीचिलक्षणं कवचं कंक
टं तत्समूहमित्यर्थः विनिर्मुंचत् विक्षिपत् सदृशीनां सरीरप्रमाणतो मेघकुमा

रापेक्षया परस्परतो वा सदृग्वयस्यां समानकालकृतावस्थाविशेषाणां सदृक्त्वचां
सदृशच्छवीनां सदृशी लावण्यरूपयौवनगुणोपेतानां तत्र लावण्यं मनोह
ता रूपमाकृतिर्यौवनं युवता गुणाः प्रियभाषित्वादयः तथा प्रसाधनानि च मंडना
नि अंगेषु चांगेषु अविधवावधूभिर्जीवत्पतिकानारीभिर्यदुपदत्तं प्रेंखनकं
त च मंगलानि च दध्यक्षतादीनि गानविशेषा वा सुजल्पितानि च आशीर्वचनानि
तिद्वंद्वस्तैः करणभूतैरिति इदं वास्य प्रीतिदानं दत्तवंतस्तद्यथा अष्टौ हिरण्यकोटीः हिरण्यं
रूप्यं एवं सुवर्णकोटीः शेषं च प्रीतिदानं गाथानुसारेण तणितव्यं यत्रप्रणकारिकागाथा
श्चेहनोपलभ्यंते केवलं ग्रंथांतरानुसारेण लिख्यंते अट्ठहिरण्णसुवण्णयकोडिउ अट्ठ
कुंडला हारा अट्ठ हारद्धहारएक्कावलीउ मुत्तावली अट्ठ १ कणगावलीरयणावली कडगजु
गा कडग तुडियजोयखोमजुगा वक्कजुगपट्टजुगाइं दुकूलजुयाइं ला अट्ठ २ सिरिहिरि
धिति कित्तीउ बुद्धीलच्छीयहोंति अट्ठ णंदा सहाय तलाक्षय चियनाडाइं अस्साय ३ ह
त्थी जाणजुगा सीया तह संदमाणसिखिल्लीय विअडयेजाणा रहगामा दासीउ ४ किंकर

ज्ञाताटृत्तिः ४४

कंचुइमयहरवरिसधरे निविडइरीवयालेय ८ ईघालगपडिकडव्वियअवाउउयअवग्गव्वा ५
पाचाढालितिरियकरोडियाउपल्लंकएयपडि सेज्जाइंसाईहिं विसिवा आसणसेयएयअड
८६ हंसे कोंचेगरुडेउणयपणयदीहसद्देय पउमेमयरेपउमे होइ दिसासोत्थिए अट्टेरे
७ तेल्लेकोट्ठसमुग्गापत्ते चोएयतगरएलाय हरियालेहिंगुलुए मणोसिलासासवसम
मुग्गो ८ खुज्जाचिलाइवामणिवडभीउ बब्बरीबउसीजोणियपल्हवियाउईसिणियाधारुइणि
याया ९ लासियलउसियदमिलीसिंहलितहआरबीपुलिंदीय पक्कणिबहलिमुरुंडिसबरी
सबरीउय १० छत्तधरीचेडीउ चामरतालियंटधरीउ सकरोडियाधरीउ खीराईपंचधावी
उ ११ अङ्गमद्दियाउम्मद्दिगण्हविगमंडियाउय वण्णयचुण्णयपीसियकीलाकारयदवगारी ५
उत्थावियाउतहणाडइलकोडुंबिणीमहाणसणी भंडारियअज्झधारिपुप्फधरी पाणियधरी
य १३ वलिकारियसेज्जाकारियाउअब्भिंतरीउ बाहिरिया पडिहारीमालारीपेसकारीउअ
ट्ठत्ति १४ अत्रवाचनान्तरे पाठक्रमः स्वरूपंच अट्ठ मउडेमउडप्पवरे अट्ठकुंडलेकुंडलजोय
एवमो चित्ते नायव्वं हारा ईऽ हारो अद्धहार सनवसरिको एकावली विचित्रमणि ४४

कामुक्ताफलमयी कनकावली कनकमणिमयी करकानि कलाचिकासरणानि योगो युगलं
त्रुटिका बाहुरक्षिका क्षौमं कार्पासिकं वटकं त्रसरीमयं पट्टं सूत्रमयं दुकूलं दुकूलाभिधा
नवृक्षवल्कलनिष्पन्नं श्रीप्रभृतयः षट् देवताप्रतिमाः संभाव्यंते नंद्यादीनां लोकतोऽवा
सेयः अन्येत्वाहुः नंदं वृत्तलोहासनं भद्रं भद्रासनं मूढकइति यत्प्रसिद्धं तलत्ति अस्य
वेपाठः अट्ठतलेतलप्पवरे सव्वरयणामए नियगवरत्तवणकेऊ तेच तालवृक्षाः संभाव्यं
ते ध्वजाः केतवो वा वयत्ति गोकुलानि दससाहस्रिकेण गोव्रजेनेत्येवं रूपं नाडयत्ति बत्तीस
इबद्धेणं नाडएणमिति इदरूपं द्वात्रिंशद्बद्धं द्वात्रिंशत्पात्रबद्धमिति व्याख्यातारः आसत्ति
आसेअस्सप्पवरे सव्वरयणामए सिरिघरपडिरूवे श्रीगृहं भांडागारं एवं हत्थिनो पि
यानानि शकटादीनि युग्यानि गोल्लविषये प्रसिद्धानि जंपानानि द्विहस्तप्रमाणानि चतु
रस्राणि वेदिकोपशोभितानि शिबिकाः कूटाकारेणाच्छादिताः स्पंदमानिकाः पु
रुषप्रमाणायामाः जंपानविशेषाः गिल्लयः हस्तिन उपरि कोल्लररूपा मानुषंगिल्ले
तिये ति लाटानां यानि अड्डपल्यानानि तान्यन्यविषयेषु थिल्लीउ अस्सति थीयंते रहत्ति

सांग्रामिकाः पारियानिकाश्च प्रा० तत्र संग्रामरथानां कटीप्रमाणा फलकवेदिका भवति
यानेतरमश्वा हस्तिनश्चाधो यंते तत्तेयादन कृता ज्ञेयाः गामेत्ति इहकुलसाहस्रिको
ग्रामः तिविहदीवत्ति त्रिविधा दीपाः अवलंबनदीपाः शृंखलाबद्ध इत्यर्थः उत्कंचनदीपाः
ऊर्ध्वदंडवंतः पंजरदीवा अभ्रपटलादिपंजरयुक्ताः चयोप्येते त्रिविधाः सुवर्णरूप्प
तदुभयमयावा इति एवंस्थाली आदीनि सौवर्णादिभेदेन त्रिधा वाच्यानि कइलिका
कलाचिका अवइयत्ते तापिका हस्तकः अवयक्कत्ति अवपक्यात पिकेति संभा
अते त्तिसिया उत्ति आसनविशेषाः करोटिकाधारिकाः स्थिगिकाधारिकाः इंवकारि
काः परिहासकारिकाः शेषं रूढितोऽवसेयं अलं चेत्यादि विपुलं प्रचुरं धनं गणिम
धरिममेयपरिच्छेद्यभेदेन चतुर्विधं कनकं सुवर्णं रत्नानि कर्केतनादीनि स्वस्व
जातिप्रधानानि वस्त्राणि च मणयः चंद्रकान्ताद्याः मौक्तिकानि च शंखाश्च प्रतीता
एव [struck through] अथवा शिलाश्च राजपट्टा गंधपेषणशिला वा विद्रु
माणि च प्रवालानि रक्तरत्नानि च पद्मरागादीनि एतान्येव संतसत्ति सत्त्विद्यमानं ४५

यत्सारं प्रधानं स्वापतेयं द्रव्यं तद्दत्तवंताविति प्रक्रमः ॥ किं भूतं अलाहित्ति अं पर्या
संपरिपूर्णं स्तव त्तिजावत्ति ॥ यावत्परिमाणं आसत्तमात् कुलवंशेण वंशो लवः ॥ कुल
वंश्यस्तस्मात् सप्तमं पुरुषं यावत् इत्यर्थः ॥ पकाममत्यर्थं दातुं दीनादिभ्यो दाने ॥ ए
वमोत्तुं स्वयं भोगे ॥ परिभाषितुं दाने परिभोगे नतेन तस्यपरिमाणं दत्तवंताविति प्रकृतं ॥
उप्पित्ति उपरिकुट्टमाणेहिं ॥ मुइंगमत्थएहिंति ॥ स्फुटद्भिरिवातिरभसास्फालनात् म
दंगमस्तके मर्द्दलमुखपुटे ॥ रायगिहे नगरे सिंघाडग इत्यनेना जापकांशेन इदं दृष्टव्यं
सिंघाडगतिगचउक्कचच्चर चउमुहमहापहेसु ॥ महया जणसद्देइ वा इइ या बहु
रणादिदं दृश्यं जणवूहेइ वा जणबोलेइ वा जणकलकलेइ वा जणुम्मीइ वा जणुक्क
लियाइ वा [struck through] जणसण्णिवाएइ वा बहुजणो अन्नमन्नस्स एव
माइक्खइ एवं पण्णवेत्ति एवं भासइ एवं परूवेत्ति एवं खलु देवाणुप्पिया समणे ३ आ
दिकरे तीर्थकरे जाव संपाविउकामे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दुइज्जमाणे इ
हमागए इह संपत्ते इह समोसढे इहेव रायगिहे नगरे गुणसीलए चेइए अह

ज्ञाताधर्म॰ पडिरूवं उग्गिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ तं महप्फलं खलु भो देवाणु
४६ प्पिया तहारूवाणं अरहंताणं भगवंताणं नामगोयस्स वि सवणयाए किमंग पुण अभिगमण
वंदण नमंसण पडिपुच्छण पज्जुवासणयाए एगस्स वि आरियस्स धम्मियस्स सुवयणस्स स
वणयाए किमंग पुण विउलस्स अट्ठस्स गहणयाए तं गच्छामो देवाणुप्पिया समणं भगवं म
हावीरं वंदामो नमंसामो सक्कारेमो सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासामो
एयं णो पेच्चभवे इह भवे य हियाए सुहाए खमाए निस्सेयसाए आणुगामियत्ताए भविस्सइ त्ति क
ट्टु बहवे उग्गा उग्गपुत्ता भोगा भोगपुत्ता एवं राइण्णा खत्तिया
माहणा भडा जोहा मल्लई लेच्छई अन्ने य बहवे राईसर तलवर माडंबिय कोडुंबिय इ
ब्भ सेट्ठि सेणावइ सत्थवाहप्पभितियओ अप्पेगइया वंदणवत्तियं अप्पेगइया पूयणवत्ति
यं एवं सम्माणवत्तियं कोऊहलवत्तियं असुयाइं सुयाइं सुणिस्सामो सुयाइं णि
स्संकियाइं करिस्सामो मुंडे भवित्ता आगाराओ अणगारियं पव्वइस्सामो पंचाणु
व्वइयं सत्तसिक्खावइयं दुवालसविहं गिहिधम्मं पडिवज्जिस्सामो अप्पेगतिया जिणभत्ति ४६

रागेणं अप्पेगइया जीयमेयंति कट्टु ण्हाया कयबलिकम्मा कयकोउयमंगलपाय
च्छित्ता सिरसाकंठेमालकडा आविद्धमणिसुवण्णा कप्पियहारद्धहार तिसरयप
लंबमाणकडिसुत्तयसुकयसोहाभरणा वत्थपवरपरिहिया चंदणोलित्तगायस
रीरा अप्पेगइया हयगया एवं गयरहसिबियासंदमाणिगया अप्पेगइया पाय
विहारचारिणो पुरिसवग्गुरापरिक्खित्ता महया उक्किट्ठसीहणायबोलकलकलरवेणं समु
द्दरवभूयंपिव करेमाणा रायगिहस्स णगरस्स मज्झंमज्झेणं ति अस्यायमर्थः शृं
गाटकादिषु यत्र महाजनशब्दादयस्तत्र बहुजनोन्योन्यस्यैवमाख्यातीति वाक्यार्थः
महयाजणसद्देइति महान् जनशब्दः परस्परालापादिरूप इकारो वाक्यालंकारार्थः वाशब्दः
पदांतरापेक्षया समुच्चयार्थः अथवा सद्देवइति इह संधिप्रयोगाद् इतिशब्दो द्र
ष्टव्यः स च उपप्रदर्शने यत्र महान् जनशब्द इति वा यत्र जनव्यूह इति वा जनसमुदाय इत्य
र्थः जनबोलो व्यक्तवर्णध्वनिः जनकलकलः स एवोपलभ्यमानवचनविभागः जनो
र्मिः संबाधः एवं उत्कलिका लघुतरः समुदाय एव सन्निपातो परापरस्थाना

उवाइवृत्तिः
४७
प

नैत्योजनानामेकत्रमीलनं तत्र बहुजनोऽन्योन्यस्यैवमाख्याति सामान्येन प्रज्ञाप
यति विशेषेण॥ एतदेवार्थद्वयं पदद्वयेनाह॥ भाषते प्ररूपयतीति अथवाख्याति सा
मान्येन प्रज्ञापयति विशेषेण एतदेवार्थद्वयं पदद्वयेनाह॥ भाषते प्ररूपयतीति अ
थवा आख्याति सामान्यतः प्रज्ञापयति विशेषतो बोधयति भाषते व्यक्तपर्यायव
चनतः प्ररूपयति उपपत्तितः॥ इह आगए त्ति राजगृहे इह संपत्ते त्ति गुणसीलके इह
समोसढे त्ति साधूचितावग्रहे एतदेवाह॥ इहेव रायगिहे इत्यादि॥ अहापडिरूवं ति॥ यथा
प्रतिरूपमुचितमित्यर्थः॥ तं ति तस्मात्॥ महाफलं भवतीति गम्यं॥ तहा
रूवाणं ति तथाकारस्वभावानां महाफलजननस्वभावानामित्यर्थः॥ नाम्नो यादृच्छि
कस्याभिधानस्य गोत्रस्य गुणनिष्पन्नस्य सवणयाए त्ति॥ श्रवणेन किमंग पुण त्ति किं
पुनरिति पुनरिति पूर्वोक्तार्थस्य विशेषद्योतनार्थः॥ अंगेत्यामंत्रणे परिपूर्णो वायं श
ब्दो विशेषणार्थ इति अभिगमनं अभिमुखगमनं वंदनं स्तुतिः नमस्यनं प्रणमनं प्र
तिपृच्छनं शरीरादिवार्ता प्रश्नः पर्युपासनं सेवा एतद्भावस्तत्ता तया एकस्याप्यार्यस्य ४७

आर्यप्रणेतृकत्वात् धार्मिकस्य धर्मप्रतिबद्धत्वात् वंदामो त्ति स्तुमः नमस्यामः प्र
णमामः सत्कारयामः आदरं कुर्मो वस्त्राद्यर्चनं वा सन्मानयामः उचितप्रतिपत्तिभिः
कल्याणं कल्याणहेतुं मंगलं दुरितोपशमहेतुं देवं चैत्यमिव चैत्यं पर्युपास्यामः सेवा
महे एतत् णे अस्माकं प्रेत्य तावज्जन्मान्तरे हिताय पथ्यान्नवत् सुखाय शर्मणे
क्षमाय संगतत्वाय निःश्रेयसाय मोक्षाय आनुगामिकत्वाय भवपरंप
रासुसानुबंधसुखाय भविष्यतीति कृत्वा इति हेतोः बहवे उग्गा आदिदेवावस्थापि
तारक्षवंशजाः उग्रपुत्रास्त एव कुमाराद्यवस्थाः एवं भोगा आदिदेवेनैवावस्थापित
गुरुवंशजाः राजन्याः भगवद्वयस्यवंशजाः क्षत्रियाः सामान्यराजकुलीनाः भटाः शौ
र्यवंतो योधास्तेभ्यो विशिष्टतराः मल्लकिनो लेच्छकिनश्च राजविशेषाः यथा श्रू
यंते चेटकराजस्याष्टादशगणराजानो नव मल्लकिनो नव च लेच्छकिन इति लिच्छ
इति क्वचिद् दृश्यते सा व्याख्याता लिप्सव इति संस्कारेणेति राजेश्वरादयः प्राग्वत् अ
प्येगइय त्ति अप्येके केचन वंदनवत्तियं ति वंदनहेतोः शिरसा कंठे च कृता धृता

ज्ञाता वृत्ति: ४८

मालायेषां ते शिरसाकंठेमालकृताः कल्पितानि हारार्द्धहारत्रिसरिकाणि प्रालंबश्च प्र
लंबमानः कटिसूत्रकं च येषां ते तथा तथान्यान्यपि स्फुटतश्चोत्तमान्याभरणानि येषां
ते तथा ततः कर्मधारयः चंदनावलिप्तानि गात्राणि यत्र तथाविधं शरीरं येषां ते त
था पुरिसवग्गुरत्ति पुरुषाणां वागुरेव वागुरा परिकरः महया महताउक्किट्ठित्ति आनंदम
हाध्वनिः सिंहनादश्च बोलश्च वर्णव्यक्तिवर्जितो ध्वनिरेव कलकलश्चाव्य
क्तवचनः स एव एतल्लक्षणो यो रवस्तेन समुद्ररवभूतमिव जलधिशब्दप्राप्त
मिव तन्नगरमिवेत्यर्थः नगरमिति गम्यते कुर्वाणाः एगदिसि एकया दिशा पूर्वोत्त
रलक्षणया एगाभिमुहा एकं भगवंतं अभिमुखं येषां ते एकाभिमुखा निर्गच्छं
ति इमं च णं ति इतश्च रायमग्गं ओलोएमाणे एवं च णं विहरति तएणं से मेहे कुमारे
ते बहवे उग्गे जाव एगदिसाभिमुहे निगच्छमाणे पासति पासित्ता इत्यादि स्फुटं इंदमहेत्ति इंद्रो
त्सवः एवमन्यान्यपि पदानि नवरं स्कंदः कार्त्तिकेयः रुद्रः प्रतीतः शिवो महादेवः वैश्र
मणो यक्षः राट् नागो भवनपतिविशेषः यक्षो भूतश्च व्यंतरविशेषः चैत्यं सामान्य ४८

न प्रतिमाः पर्वतः प्रतीतः उद्यानयात्रा उद्यानवने गिरियात्रा गिरिगमनं गहियागमणपवित्तीए
त्ति गृहीतागमनप्रवृत्तिका गृहीतवार्त्तेत्यर्थः चाउग्घंटं आसरहंति चतस्रो घंटा अव
लंबमाना यस्मिन् स तथा अश्वप्रधानो रथोऽश्वरथः जुत्तमेव आसाइत्ति उवले
त्ति आरूढो महयाइत्यादि महद्वयत्भटानां चटकरवृंदं विस्तारवत् समूहः तल्लक्ष
णो यः परिवारस्तेन संपरिवृतो यः स तथा जंभकदेवास्तिर्यग्जृंभकचारिणः उवयमा
णेत्ति अवपततो व्योमांगणादवतरतः उप्पयंतेत्ति ऊर्ध्वकालादुत्पततो दृष्ट्वा सचि
त्तेत्यादि सचित्तानां द्रव्याणां पुष्पतांबूलादीनां विउसरणयाएत्ति व्यवसरणेन व्यु
त्सर्जनेन अचित्तानां द्रव्याणां अलंकारवस्त्रादीनां अव्यवसरणेनाव्युत्सर्जनेन क्व
चिद्विओसरणयाएत्ति पाठः तत्र अचेतनद्रव्याणां छत्रादीनां व्युत्सर्जनेन परिहा
रेण उक्तं च अवणेइ पंच ककुहाणि रायवरवसहचिंधभूयाणि छत्तं खग्गोवाह
ण मउडं तह चामराउत्ति एकशाटिको यस्मिंस्तत्तथा तच्च तदुत्तरासंगकरणं चोत्तरी
यस्य न्यासविशेषस्तेन चक्षुस्पर्शे दर्शने अंजलिप्रग्रहेण हस्तजोडनेन मनस एकत्व

ज्ञातावृत्तिः ४९ करणेन एकाग्रत्वविधानेनेति॥ भावः कश्चिद्गत्ति भावेणं ति पाठः॥ असंविग्ग छतीति प्रक्र
मः॥ महइमहालियाए त्ति॥ महत्यां अतिमहत्यां धर्म्मकथत चारित्रात्मकं आख्याति यथा च जीवा
बध्यंते कर्म्मभिः मिथ्यात्वादिहेतुभिः यथा मुच्यंते तैरेव ज्ञानाद्यासेवनतः यथा संक्लि
श्यंते अशुभपरिणामा भवंति तथा आख्यातीति॥ इहावसरे धर्म्मकथा उपपातिको
क्ता सविस्तरा वाच्या अन्यथा बहुग्रंथ इति न लिखिता॥ सद्दहामीत्यादि श्रद्दधे अस्तीत्येवं
प्रतिपादने ग्रंथप्रवचनं नैर्ग्रंथं शासनं॥ एवं पत्तियामि त्ति॥ प्रत्येमि प्रत्ययं करोम्यत्रेति
भावः॥ रोचयामि करणरुचिविषयीकरोमि चिकीर्षामीत्यर्थः॥ किमुक्तं भवति॥ अभ्यु
त्तिष्ठामि अभ्युपगच्छामीत्यर्थः॥ तथा एवमेतत् यद्भवद्भिः प्रतिपादितं तत्तथैवेत्यर्थः॥
तथैतत् यथा वस्तु किमुक्तं भवति अवितथमेतत् सत्यमित्यर्थः॥ अत इच्छिएणं त्यादि॥
प्राग्वत्॥ इच्छिए त्ति इष्ट पडिच्छिए त्ति पुनः पुनरिष्टः भावतो वा प्रतिपन्नः॥ असितक
चितः स्यादुत्सावष्मिवापगतः॥ आगाराओ अणगारियं ति अगारात् निःक्रम्य अनगारितां साधुतां प्रव्रजि
तुं॥ मणोमाणसिएणं ति॥ मनसि स्वं यन्मानसिकं तेन अप्रवृत्तिनेत्यर्थः॥ तथा ४९

स्वेदागता आगतस्वेदा रोमकूपा येषु तानि स्वेदागतरोमकूपाणि ततः प्रगलंति
विलीनानि च क्लिन्नानि गात्राणि यस्याः सा तथा॥ तत्क्षणमेव प्रवृत्तामा तिव च तत्र वल
एवा अवरुग्णं म्लानं दुर्बलं च शरीरं यस्याः सा तथा॥ लावण्येन शून्या लावण्यशून्या नि
श्छाया गतश्रीका च या सा तथेति पदचतुष्टयस्य कर्म्मधारयः॥ दुर्बलत्वात् प्रशिथिलानि
भूषणानि यस्याः सा तथा॥ कृशीभूतबाहुत्वात् पडंत त्ति विगलंति॥ खुम्मिय त्ति भू
मिपतनात् प्रदेशांतरेषु नमितानि चूर्णितानि भग्नानि धवलवलयानि यस्याः
सा तथा॥ भ्रष्टमुत्तरीयं यस्याः सा तथा ततः पदत्रयस्य कर्म्मधारयः॥ सुकुमारो
विकीर्णकेशहस्तः केशपाशो यस्याः सा तथा॥ मूर्छावशान्नष्टचेतसि सति गुर्वी अल
घुशरीरा या सा तथा॥ परशुनिकृत्तसंपानाधसतीत्यनुकरणे ससंभ्रमं व्याकुलचि
त्ततया॥ उवत्ति॥ अपवर्त्तितया क्षिप्तया त्वरितं श्री भृंगारमुखविनिर्गता
या शीतलजलविमलधारा तया परिषिच्यमाना निर्वापिता शीतलीकृता गात्रयष्टि
र्यस्याः सा परिषिच्यमाननिर्वापितगात्रयष्टिः॥ उत्क्षेपको वंशदलादिमयो मुष्टि

ग्राह्यदंतमध्यभागः तालवृंतं तालजातिव्यजनवृक्षपत्रवृंतं यस्य ठेट्ट इत्यर्थः तदाकारं वा च
र्ममयं जीवीजनकं तु वंशादिमयमेवात ग्राह्यदंतं एतै र्जनितो यो वातस्तेन स्फुरित
णं सोरकबिंदवो ऽनंतःपुरजनेन समाश्वासिता सती मुक्तावलीसन्निकाशया ऽप्या
प्रपतंत्यो ऽश्रुधारास्ताभिः सिंचती पयोधरौ करुणं च विमनाश्च दीना च यासात
थाक्रंदंती साश्रुपातं शिरः धुन्वद्धानाक्रंदंती ध्वनिविशेषेण तवमाना स्वेदजलकणादिक्ष
रंती शोचमाना दूरद्यत्र विजवंती मारस्मरेणजायमानि इष्टदृष्टा विषयत्वात्
कान्ता कमनीयत्वात् प्रियः प्रेमनिबंधनत्वात् मनसा ह्यायस्ते उपादेयतयेति मनो
ज्ञः मनसा ऽभ्यस्यते गम्यते इति मनोमः सौंदर्यगुणयोगात् स्थैर्य वैश्वासिको वि
श्वासस्थानं सम्मतः कार्यकरणे बहुमतः बहुष्वपि कार्येषु बहुवोनन्यतया ऽ
लोकतयामतो बहुमतः कार्यविघातस्य पश्चादपि मतो नुमतः तं भांडकरंडक
समानः सो भांडकरणरत्नमिव रत्नं मनुष्यजातावुत्कृष्टत्वात् रजतो वा रंज
क इत्यर्थः रत्नस्तत्वकितारत्नादिकल्पो जीवितमस्माकमुच्छ्वासयति वर्द्धय।

तीति जीवितोच्छ्वासः स एव जीवितोच्छ्वासिकः वाचनान्तरे तु जीवितउस्सईए त्ति जीवि
तस्योत्सव इति जीवितोत्सवः स एव जीवितोत्सविकः हृदयनंदिजननः उदुंबरपुष्पं
ऽजलस्यं स्वविति ऽप्रतस्तेनोपमानं जीविता ऽम्हे जीवाणमभिमाणि त्ति इह तु स्वता
वद्गीगान् यावद्वयं जीवामः इत्येतावत्सैव विचक्षितं सिद्धोपसुतः तावच्छब्दस्यो
च्चारणं तद्रूपामेवेति परिणतवयाः वर्द्धितकुलवंसतंतु च र्थमिन्वर्द्धिते वृद्धिमुपग
तेपुत्रपोत्रादिभिः कुलवंश एव संतानतंतुः दीर्घत्वसाधर्म्यात् कुलवंशतंतुः स
एव कार्यं कुर्वत्यास्मिन् ततो निराववयरकेत्ति निरपेक्षः सकलप्रयोजनानां ऽ
ध्रुवेत्ति न ध्रुवः सूर्योदयवन्न प्रतिनियतकाले वश्यताचियोमनियतः ईश्वरा
देरपि दरिद्रादिसावात् अशाश्वतः क्षणनश्वरत्वात् व्यसनानि द्यूतचौर्यादीनि तच्छैरु
पद्रवैश्च स्वपरसंभवैः सदोपद्रवैर्वा नित्यतो व्याप्तः सटनं कुष्ठादीनां गुल्मादेः पतनं बाह्व
दे: खड्गछेदादिना विध्वंसनं क्षयः एतएव धर्मा यस्य स तथा पश्चाद्विवक्षितकाला
त्परतः पुरं वत्तिपूर्वं तच्च लमलंकृतो ऽवश्य विप्रहरणिज्जो ऽवश्यत्याज्यः सोकणं

ज्ञातावृत्तिः ॥५९॥ जाणंति। कस्य को जानाति न कोपीत्यर्थः। अंबताओ कः पूर्वं पित्रोः पुत्रस्य वान्योन्य
तः गमनाय परलोके उत्सहते। कः पश्चात्। गमनाय तत्रैवोत्सहत इति किं पूर्वं को वा
पश्चात् म्रीयत इत्यर्थः। वाचनान्तरे मेघकुमारस्य भार्यावर्णक एवमुपलभ्यते। इमाओ ते दं
जाया विपुलकुसलसद्वकालजोजियसरोइयाउ मद्दवागुणजुत्तनिउणविणउवयारपंडित
वियक्खणाउ। पंडितानां मध्ये विचक्षणाः पंडितविचक्षणा अतिपंडिता इत्यर्थः मंजुलमिय
महुररसणियहसियविप्पेक्खियगइलाससचिट्ठियविसारयाउ। मंजुलं कोमलं शब्दः
मितं परिमितं मधुरमकठोरमर्थतो यत्संद्वणितं तत्तथा। विस्पितं विशिष्टस्पितिः
शेषं कण्ठ्यं। अविकलकुलसीलसालिणीउ विशुद्धकुलवंससंताणतंतुवद्धणपग
प्पवेसालीउ। विशुद्धकुलवंशएवसंतानतंतुविस्तारतंतुः तद्वर्द्धनाय प्रकृष्टा ग
र्भाः पुत्रवरगर्भास्तेषां यउद्भवः संभवस्तल्लक्षणो यः प्रभावो माहात्म्यं सवियते या
सां तास्तथा। मणोणुकूलहियइच्छियाउ मनोनुकूला अस्य ना हृदये नेप्सिताश्चेति क
र्मधारयः। अट्ठतुब्भगुणवल्लहाउ गुणैर्वल्लभा यास्तास्तथा सयाउउत्तमाणणिच्चं ॥५९॥

भावाणुरत्तसव्वंगसुंदरीउ इति। इह कामभोगा इति इलेन तदाधारभूतानि स्त्रीपुरुषश
रीराण्यभिप्रेतानि। असुयमेव अशुचिकारणत्वात् वांतं वमनं तदाश्रवंतीति वान्तास्र
वाः एवमन्यान्यपि नवरं पित्तं प्रतीतं खेलो निष्ठीवनं शुक्रं सप्तमो धातुः शोणितं रक्तं
दुरूपाणि विरूपाणि मानि मुत्रपुरीषपूयानि तैर्बहुप्रतिपूर्णा उच्चारं पुरीषं प्रश्रवणं मु
त्रं खेलः प्रतीतः सिंघाणो नासिकामलः वान्तादिकानि प्रतीतानि ते तेभ्यः संभव उत्पत्ति
र्येषां ते तथा इमे य ते इत्यादि इदं च ते आर्यकः पितामहः प्रायः पितुः पितृकार्यकः
पितुः प्रपितामहः तेभ्यः सकाशात् आगतं यत्तत्तथा अथवा आर्यकप्रार्यकः पि
तृप्रंशः परिपाटिरित्यर्थो तया तेनागतं यत्तत्तथा अग्गिसाहिए इत्यादि अग्निस्वामि
कस्य साधारणं होइ यत्ति दायादाः पुत्रादयः एतदेव द्रव्यस्यापि पारवश्यप्रतिपादना
र्थं पर्यायान्तरेणाह। अग्निसामाणे इत्यादि शटनं वस्त्रादेरतिस्वगितस्य पतनं च
र्णादि विनाशः। विध्वंसनं क्रमकृत्तैः स छेदो धर्मो यस्य स तत्तथा जाहोणं सेवाए त्ति ति
मरात्स कुतः बहूहिं विस इत्यादि बहूहिं विषयाणं शब्दादीनां अणुलोमास्तेषु मह

त्ति जनकत्वेन अनुकूलाः विषयानुलोमास्ताभिः आख्यापनाभिश्च सामान्यतः प्रति
पादनैः प्रज्ञापनाभिश्च विशेषतः कथनैः संज्ञापनाभिश्च संबोधनाभिः विज्ञापनाभि
श्च विज्ञप्तिकाभिः सप्रणयप्रार्थनैः चकाराः समुच्चयार्थाः आख्यातुं वा प्रज्ञाप
यितुं वा संज्ञापयितुं ज्ञापयितुं न शक्नुमः इति प्रक्रमः ताहे त्ति तदा विषयप्रतीकूला
भिः शब्दादिविषयाणां परिभोगनिषेधकत्वेन प्रतिलोमाभिः संयमाद्भयमुद्वेगं च
चलनं कुर्वन्ति यास्ताः संयमभयोद्वेगकारिकाः संयमस्य दुःकरत्वप्रतिपादनपराभि
भिः प्रज्ञापयंतौ एवमवादिष्टां निर्ग्रंथाः साधवस्तेषामिदं नैर्ग्रंथं प्रवचनमेव प्रा
वचनं वचनं शास्त्रं इष्टं सद्भूतं वा नास्मादुत्तरं प्रधानतरं विद्यत इत्यनुत्तरं अनुत्त
रं वा विद्यतीत्याह केवलिकं केवलमद्वितीयं केवलीप्रणीतत्वाद्वा केवलि
कं प्रतिपूर्णमपवर्गप्रापकैर्गुणैर्भृतं नयनशीलं नैयायिकं मोक्षगमकमित्य
र्थः न्यायेन वा चरति नैयायिकं संशुद्धं सामस्त्येन शुद्धमेकान्ताकलंकत्वात् यथा सं
शिश्यंते अशल्यपरिणामा भवंति तथा आख्यातीति इहावसरे धर्मकथा उप

५२

पातिकोक्ता भणितव्या अत्र बहुग्रंथपार्श्वमित्यर्थः शल्यानि मायादीनि कृंततीति
शल्यकर्त्तनं सेधनं सिद्धिः हितार्थप्राप्तिस्तन्मार्गः अहितकर्म्मविच्युतेरुपायः यां
तितदिति यानं ईरूपमं यानं निर्याणं सिद्धिक्षेत्रं तन्मार्गो निर्याणमार्गः एवं निर्वाणमा
र्गोपि नवरं निर्वाणं सकलकर्म्मविरहजं सुखमिति सर्वदुःखप्रक्षीणमार्गः सकलदुःख
प्रक्षयोपायः अहिरिव एकान्तो निश्चयो यस्याः सा एकान्ता सा दृष्टिर्बुद्धिर्यस्मिन् निर्ग्रंथ
प्रवचने चारित्रपालनं प्रतीत देकान्तदृष्टिकं अहिपक्षे आमिषग्रहणैकतानता
क्षुरणएकान्ता एकनिश्चया दृष्टिर्बुद्धिर्यस्य स एकान्तदृष्टिकः क्षुर इव एकधारं द्वि
तीयधाराकल्पाया अपवादक्रियाया अभावात् पाठान्तरे एकविभागाश्रयस्य
धारायस्य तत्तथा लोहमया इव यवाः चर्वयितव्याः प्रवचनमिति प्रक्रमः लोहमयं च य
वचर्वणमिव दुःकरं चरणमिति भावः वालुकाकवल इव निरास्वादं वैषयिकसुखास्वा ८
दनापेक्षया प्रवचनं गंगेव महानदी प्रतिश्रोतोगमनं तद्वा वस्तला तया प्रतिश्रोतो
गमनेन गंगेव दुस्तरं प्रवचनमिति भावः एवं समुद्रोपमा वचनमपि तीक्ष्णं ख

ज्ञाता वृत्तिः कांतादिकं क्रमितव्यमाक्रमणीयं॥ यदेतत्प्रवचनं तद्विति॥ यथा खड्गादिक्रमितुमशक्यमेव
५३ मनाक्य प्रवचनमनुपालयितुमितिभावः॥ गुरुकं महाशिलादिकं॥ तं बइत्यम्यमवलंब
मितव्यमनीयं प्रवचनं गुरुकलंबनमिव दुष्करं तदिति भावः॥ असिधाराय्यां संचरणी
यमिति … त्येवं रूपं यद्व्रतनियमस्तदसिधाराव्रतं चरितव्यमासेव्यं॥ यदेतत्प्र
वचनानुपालनं तदेतत्तदैतत् दुष्करमित्यर्थः॥ कस्मादेतस्य दुःकरत्वमत उच्यते॥ लो
यकप्पइत्यादि॥ रइय एवन्ति॥ औदेशिकसेइ स्तत्र मोदकचूर्णादिपुनर्मोदकतया र
चितं तत्कमिति गम्यते॥ दुर्भिक्षभत्तं यद्भिक्षुकार्थं दुर्भिक्षे संस्क्रियते॥ एवमन्या
न्यपि नवरं कांतारमरण्यं वद्दलिका वृष्टिर्ग्लानः सन्नारोग्याय यद्ददाति॥ सग्लानभ
क्तं मूलानि पद्मसिनादिकादीनां कंदाः सूरणादयः॥ फलान्याम्रफलीदीनि॥ बीजा
नि शाल्यादीनि॥ हरितं मधुरतृणकटुसामादि तो भोक्तुं वा पातुं वा नालं न समर्थः॥ सीता
द्यधिसोढुमिति योगः॥ रोगाः कुष्टादयः आतंकाः आशुघातिनः शूलादयः॥ उ
च्चावचान्नानामासिधानानू ग्रामकंटकानिंद्रियवर्गप्रतिकूलान्॥ एवं खलु ५३

आम्मताउ इत्यादि यथा लोहयवचर्वणा दुष्करं दुःखासेव्यं नैर्ग्रंथं
प्रवचनं सवह्निरूक्तमेवं दुरनुचरमेव केषां क्लीबानां मेदसंहननाकीतराणां
चित्तावष्टंभवर्जितानामत एव कापुरुषाणां कुत्सितनराणां विशेषणद्वयं।
रूकव्यं पूर्वोक्तमेवार्थमाह दुरनुचरं दुःखासेव्यं नैर्ग्रंथ्य प्रवचनमिति प्राकृ
तं कस्येत्याह प्राकृतं कस्येत्याह प्राकृतजनस्य एतदेव व्यतिरेकेणाह णो चेव णं
नेव धीरस्य साहसिकस्य दुरनुचरमिति प्रक्रमे तदेव वाक्यांतरेणाह निश्चितं
निश्चयावकसितं व्यवसायः कर्म यस्य पत्तत्ति अत्र नैर्ग्रंथे प्रवचने किंदुष्करं
करणतया किंचिदुरमित्यर्थः कस्यामित्याह करणतायां करणानां संयमव्यापा
राणां भावः करणता तस्यां संयमयोगेषु मध्ये इत्यर्थः तत्तस्मादिच्छास्य व ता
तमहइयं ति महाप्रयोजनं महार्थं महामूल्यं महार्हं महापूज्यं महतां वा योग्यं राज्या
भिषकसामग्री उपस्थापयत संपादयत सौवर्णादीनां कलशानां मष्टोत्तरं शतानि
चतुष्षष्ठ्याधिकानि सोमघाणं ति भौमानां पार्थिवानामित्यर्थः सर्वोदकैः

सर्वतीर्थसंसेवैः एवंमत्तिकाशिरपि जयजयेत्यादि जयजयत्वं जयंजत्तस्व नंद
ति नंदयंतीति वा नंदः समृद्धः समृद्धिप्रापको वा तदामंत्रणं हे नंद एवं सद्रकल्याण
कारिन् हे जगन्नंदकर भद्रंते तव त्विति शेषः इहगामे याव त्करणदिदं ईश्यं इदं
इव देवाणं चमरो इव असुराणं धरणो इव नागाणं चंदो इव ताराणं गामागर
इह इंदके याव त्करणदिदं इदं नगरखेडकब्बडदोणमुहमडंबपट्टणसंवाहसंणि
वेसाणं आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं
कारेमाणे पालेमाणे महयाहयनट्टगीयवाइयतंतीतलतालतुडियघणमुइंगपडु
प्पवाइयरवेणं विउलाइं भोगभोगाइं भुंजमाणे विहराहि त्ति तत्र करादिग
म्यो ग्रामः आकरो लवणाद्युत्पत्तिभूमिः अविद्यमानकरं नगरं धूलिप्राका
रं खेटं कुनगरं कर्बटं यत्र जलस्थलमार्गाभ्यां भांडान्यागच्छंति तद्द्रोणमुखं
सत्रयोजनाभ्यंतरे सर्वतो ग्रामादिनास्ति तन्मडंबं पत्तनं द्विधा जलपत्तनं
स्थलपत्तनंच तत्र जलपत्तनं यत्र जलेन भांडान्यागच्छंति यत्र तु स्थलेन त ५४

स्थलपत्तनं यत्र पर्वतादुर्गे लोका धान्यानि संवहंति स संवाहः सार्थादिस्था
नं सन्निवेशः आधिपत्यं अधिपतिकर्म रक्षेत्यर्थः पौरेवत्यं पुरोवर्त्तित्वं
अग्रेसरत्वमित्यर्थः स्वामित्वं नायकत्वमित्यर्थः भर्त्तृत्वं पोषकत्वं मह
त्तरकंच मुत्तमत्वं आज्ञेश्वरस्य आज्ञाप्रधानस्य सतः सेनापतेर्भावः आज्ञेश्व
सेनापत्यं कारयन् अन्यैर्नियुक्तकैः पालयन् स्वयमेव महता प्रधानेन अ
हयत्ति आख्यानप्रतिबद्धानि नित्यानुबंधीनि वा यन्नाट्यं नृत्तं गीतं गानं तथा
वादितानि यानि तंत्री च वीणा तलौ च हस्तौ तालाश्च कंसिकाः तुडितानि
च वादित्राणि तथा घनसमानध्वनिर्यो मृदंगः घनमृदंगः पटुना नापुरुषेण
प्रवादितः स चेति द्वंद्वः ततस्तेषां यो रवः स्वनस्तेन इति कमु इति कृत्वा एवमभि
धाय जयजयशब्दं प्रयुंक्ते स्म तुति करा नद इति ततो सो राया जाते महयाइ याव
त्करणात्कृत्यं एवं वर्णको वाच्यो महयाहिमवंतमलयमंदरमहिंदसारे अ
च्चंत विसुद्धदीहरायकुलवंसप्पसूए निरंतरं रायलक्खण विराइयंगमंगे बहु

जण बहुमाणपूइए सव्वगुणसमिद्धे खत्तिए मत्तिमुत्ते पित्रादिभिर्मुर्धन्यभिषिक्तत्वा
त् माउपिउसुजाए दयपत्ते सीमंकरे मर्यादाकारित्वात् सी
मंधरे कृतमर्यादापालकत्वात् एवं खेमंकरे खेमंधरे क्षेममनुपद्रवता मणु
सिंदे जणवयपिया हितत्वात् जणवयपुरोहिए शांतिकरत्वात् सेउकरे मा
र्गदर्शकत्वात् केउकरे अद्भुतकारित्वात् केतुश्चिह्नं नरवरे नरः प्रवरो यस्येति
कृत्वा पुरिसवरे पुरुषाणां मध्ये वरत्वात् पुरिससीहे शूरत्वात् पुरिसआसी
विसे कोपसमर्थत्वात् पुरिसपुंडरीए सेव्यत्वात् पुरिसवरगंधहत्थी प्रतिराजग
जभंजकत्वात् अड्ढे दित्ते दर्पवान् वित्ते प्रतीतः विच्छिन्नविउलभवणसयणा
सणजाणवाहणाइन्ने विस्तीर्णविपुलानि अतिविस्तीर्णानि भवनशयनासनानि
यस्य स तथा यानवाहनैराकीर्णो निर्गुणं इति यस्य स तथा ततः कर्मधारयः
बहुधण बहुजायरूवरयए बहु च धनं गणिमादिकं बहुनी च जातरूपरज
ते यस्य स तथा आयोगपयोगसंपउत्ते आयोगस्यार्थलाभस्य प्रयोगा उपायाः ५५

संप्रयुक्ताः व्यापारिता येन स तथा विच्छड्डियपउरभत्तपाणे विच्छर्द्दिते त्यक्ते
बहुजनेभ्यो दानेनावशिष्टे वोच्छिष्टसंभवात् संजातविच्छर्द्दे च नानाविधभक्ते
भक्तपाने यस्य स तथा बहुदासीदासगोमहिसगवेलगप्पभूए बहुदासीदासाश्च गो
गोमहिषिगवेलकाः प्रभूताश्चेति समासः गवेलकाः उरभ्राः पडिपुन्नजंतकोसकोट्ठागाराउ
हागारे यंत्राणि पाषाणक्षेपयंत्रादीनि कोशो भांडागारं कोष्ठागारं धान्यगृहं प्रहरण
शाला बलवं दुब्बलपच्चामित्ते प्रत्यमित्राः प्रातिवेश्मिकाः उहयकंटयं मलियकंटयं उ
द्धियकंटयं अकंटकाः प्रतिस्पर्द्धिनो गोत्रजाः उपहता विनाशनेन निहताः सम्यग्धनह
रणेन मलिताः मानभंगेन उद्धृताः देशनिर्वासनेन अत एवाकंटकमिति एवं उवह
यसत्तुमित्यादि नवरं शत्रवो अगोत्रजा इति ववगयदुभिक्खमारिभयविप्पमुक्कं खे
मं सिवं सुभिक्खं पसंतडिंबडमरं अन्वयव्यतिरेकाभिधानस्य शिष्टसंमतत्वात् न पुनरु
क्तता दोषोत्र रज्जं पसाहेमाणे विहरतित्ति तु जीतपुत्र किंदलयामोत्ति सर्वतो
बि नत्तिमत्तं किं धरयामो विनाशयाम इत्यर्थः अथवा सर्वतो निमित्तस्य किं

ज्ञाता वृत्तिः
५९

दृष्टः तथा न वर्त्तते किं स्वप्नः कामः । किं वा ते हियइच्छिए सामन्नेति । कोवा तव दुहृदय
वांछितो मंत्र इति । उत्तियावणगुत्ति । देवाधिष्ठितत्वेन स्वर्गमर्त्यपाताललक्षण
त्रिजगत्संभविवस्तुसंपादक आपणो हट्टः कुत्रिकापणः । तस्मात्-आनीतेका
श्यपकं च नापितं शब्दयत मा कारितमिच्छामीति वर्त्तते श्रीगृहाद्भांडागारात् । निक्षेप्ति
सर्वथाविगतमलात्पोत्तियाएत्ति । वस्त्रेणमहरिहेत्यादिमहतां योग्येन वा हंसस्येव
लक्षणं स्वरूपं शुक्लता इत्यर्थः लक्षणं चिह्नं यस्य तथा तेन शाटको वस्त्रमात्रं स च पृथुलः ।
पटेत्यभिधीयते इति पटशाटकस्तेन सिंदुवारत्ति । वृक्षविशेषो निर्गुंडीति । केचित्तु ।
स्कमानि सिंदुवाराणि च कुसुमानि । एसणंति । एतत्दर्शनमिति कोसेण मित्यलंकार
अप्रस्फुटेषु राज्यजातादिषु उत्सवेषु प्रियसंगमादिमहेषु प्रसवेषु पुत्रजन्मस्तति
थिषु मदनत्रयोदशीप्रभृतिषु क्षणेषु इंद्रमहादिषु यज्ञेषु इंद्रमहादिषु नागादि
पूजास्तु पर्वणीषु च कार्तिकादिषु । अपश्चिमं अपकारम्यमंगलपरिहारार्थत्वात्पश्चि
मं दर्शनं न भविष्यतीति भावः । एतत्केशदर्शनमपनीतकेशावस्थस्याप्यकुमारस्याय ५९

दर्शनं मे तद्दर्शनपाश्चात्यं तद्भविष्यतीति भावः अथवा न पश्चिमं पौनःपुण्येन मे
घकुमारस्य दर्शनमेतद्दर्शने न भविष्यतीत्यर्थः उत्तरावक्कमणंति उत्तरस्यां दिश्यप
क्रमणम् अवतरणं यस्मात्तदुत्तरापक्रमणं उत्तराभिमुखं राज्याभिषेककाले पूर्वा
भिमुखं तदासीति दोच्चंपि तच्चंपि न दोच्चंपि त्तिरपि श्वेतापीतै राजतैः सौवर्णैः पा
यलंबित्ति पादौ यावद्यः प्रलंबते अलंकारविशेषः सपादप्रलंबः तुडियाइंति बाहुर
३१ क्षकाः केयूरांगदयोर्यद्यपि नामकोशे बाहुरक्षणतयाऽविशेषः तथापीहाकारवि
शेषेन भेदो दृश्यः दशमुद्रिकानंतकं हस्तांगुलिसंबंधि मुद्रिकादशकं स्कमणदामं
ति पुष्पमालां पिनह्यतः परिधत्तः दर्दरः चीवरावनद्धं कुंडिकादि भाजनमुखं ते
न गालिता ये तत्र पक्वा वा ये मलयत्ति मलयोद्भवं श्रीखंडं तत्संबंधिनः सुगंधयो
गंधाः तान् पिनह्यतः हारादि स्वरूपं प्राग्वत् ग्रंथिमं यत् ग्रथ्यते सूत्रादिना वेष्टिमं
यत्पुष्पितं संवेष्ट्यते यथा पुष्पलंबूसकः गेंदुकः गेंदुक इत्यर्थः पूरिमं येन वंशश
लाकामयपंजरादि कूर्चादि वा पूर्यते वासो योगिकं यत्परस्परतो नालसंघाते

नाया वृत्तिः ५७ तेन सह ध्यायते अलंकृतं कृतालंकारं विभूषितं जातविभूषं णगारचारुवेसेत्यादि
शृंगारस्यागारमिव शृंगारागारं अथवा शृंगारप्रधानं आकारो यस्याश्चासश्च वेषो
यस्याः सा तथा संगतेषु गतादिषु निपुणा युक्तेषूपचारेषु कुशला च या सा तथा तत्र
विलासो नेत्रविकारो यदाह: हावो मुखविकारः स्याद्भावश्चित्तसमुद्भवः विलासो ने-
त्रजो ज्ञेयो विभ्रमो भ्रूसमुद्भवः संलापो वै मिथो भाषा उल्लापः काकुवर्णनं
आह च अनुलापो मुहुर्भाषा प्रलापोनर्थकं वचः काकुवर्णनमुल्लापः संलापो
भाषणं मिथ इति । आमेलगत्ति आपीडः शेखरः स च स्तनप्रान्तावचूचुकस्त-
त्स्थानीयौ आमेलकौ वा परस्परमभिसंबद्धौ यमलौ समश्रेणिस्थितौ विशिष्ट
संस्थानवंतौ पयोधरौ स्तनौ यस्याः सा तथा हिमं च रजतं च कुंदश्चेन्दुश्चेति द्वं-
द्वः एषामिव प्रकाशो यस्य तत्तथा सकोरंटकपुष्पगुच्छयुक्तेनेति यावत् अहतमा-
निपुण्यमाला यत्र तत्तथा धवलमातपत्रं छत्रं नानामणिकनकरत्नानां
महार्हस्य महार्घस्य तपनीयस्य च सत्कौ उज्ज्वलौ विचित्रौ दंडौ ययोस्तेन ५७

तथा अत्र कनकतपनीययोः को विशेष उच्यते कनकं पीतं तपनीयं रक्तमिति
चिल्लियाउत्ति दीप्यमाने लीने इत्येके सूक्ष्मवरदीर्घवाले शंखकुंददकरजसां अमृ-
तस्य मथितस्य सतो यः फेनपुंजस्तस्य सन्निकाशे सदृशे ये ते तथा चामरे चंद्र-
प्रभवज्रवैडूर्यविमलदंडा इह चंद्रप्रभश्चन्द्रकान्तो मणिः तालवृन्तं व्यजनविशेषः
समसमानमहापुरुषस्य आकृत्या आकारेण समानः सदृशो यः स तथा तं संगा-
रेणेत्यादि एकाभरणादृशं आभरणलक्षणो गृहीतो नियोगः परिकरो यैस्ते तथा ते-
षां कौटुंबिकवरतरुणानां सहस्रमिति तलेलंति कोडुंबियवरतरुणपुरिसास-
हस्सियत्ति शब्दः सम्माणत्तिमतः अट्ठट्ठमंगलायत्ति अष्टाष्टेति वीप्सायां
द्विर्वचनमंगलकानि मंगल्यवस्तूनि अन्ये त्वाहुः अष्टसंख्यानि अष्टमंगलक-
संज्ञावस्तूनि तप्पढमयाएत्ति तेषां विवक्षितानां मध्ये प्रथमता तत्प्रथमता तया
वक्ष्यमाणं तिशेषाय पुरुषारूढः पुरुषा इत्यादि स्वस्तिकपंचकमित्यनेन दप्पणत्ति
आदर्शः इह यावत्करणात् इत्यादि दृश्यं तत्र अणंतरं च पुण्णकलसः भिंगारं

ज्ञा.ता.वृत्ति र दिव्वायवत्तपडागा उसयामराइंसणरइय आलोयदरिसणिज्जा वाउद्धुयविजय
५८ वेजयंतिय ऊसिया गगणतलमणुलिहंती पुरओ अहाणुपुव्वी एसं पट्ठिया तया
णंतरं च णं वेरुलियभिसंतविमलदंडं पलंबकोरंटमल्लदामोवसोहियं चंदमंडलनिभं
विमलं आयवत्तं। पवरं सीहासणं वरमणिरयणपायपीढं सपाउयाजोयसमाउत्तं बहुकिं
करकम्मकरपुरिसपायत्तपरिक्खित्तं पुरओ अहाणुपुव्वीए संपट्ठियं तयाणंतरं
च णं बहवे लट्ठिग्गाहा चामरग्गाहा पोत्थयग्गाहा फलकग्गाहा पीढग्गाहा वीणग्गाहा
कूवग्गाहा हडप्पग्गाहा पुरओ अहाणुपुव्वीए संपट्ठिया तयाणंतरं च णं बहवे दंडि
णो पिंछिणो हासकरा डमरकरा चाटुकरा कंदप्पकरा कीडंता य वायंता य गायंता य णच्चंता
य हसंता य सोहंता य सावेंता य रक्खंता य आलोयं च करेमाणा जयजयसद्दं च प
उंजमाणा पुरओ अहाणुपुव्वीए संपट्ठिया तयाणंतरं च णं जच्चाणं तरमल्लिहा
यणाणं थासगअहिलाणाणं चामरगंडपरिमंडियकडीणं अट्ठसयं वरतुरगाणं
पुरओ अहाणुपुव्वीए संपट्ठियं तयाणंतरं च णं ईसीदंताणं ईसीमत्ताणं ईसीउच्छंगविसाल ५९

धवलदंताणं कंचणकोसीपविट्ठदंताणं अट्ठसयं गयाणं पुरओ अहाणुपु
व्वीए संपट्ठियं तयाणंतरं च णं सछत्ताणं सज्झयाणं सघंटाणं सपडागाणं सतोर
णवराणं सणंदिघोसाणं सुसिलिट्ठवत्तमंडलधुराणं आइण्णवरतुरगसंपउ
त्ताणं कुसलनरछेयसारहिसुसंपग्गहियाणं बत्तीसतोरणपरिमंडियाणं
सकंकडवडेंसकाणं सचावसरपहरणावरणभरियजुधसज्जाणं अट्ठसयं रहा
णं पुरओ अहाणुपुव्वीए संपट्ठियं तयाणंतरं च णं असिसत्तिकोंततोमरसूल
लउलभिंडिमालधणुपाणिसज्जं पायत्ताणीयं पुरओ अहाणुपुव्वीए संपट्ठियं त
ए णं से मेहे कुमारे हारोत्थयसुकयरइयवच्छे कुंडलुज्जोइयाणणे मउडदित्तसि
रए अब्भहियरायतेयलच्छीए दिप्पमाणे सकोरंटमल्लदामेणं छत्तेणं धरि
ज्जमाणेणं सेयवरचामराहिं उद्धुव्वमाणीहिं हयगयरहपवरजोहकलिए बल
चाउरंगिणीए सेणाए समणुगम्ममाणमग्गे जेणेव गुणसीलए चेइए तेणे
व पहारित्थ गमणाए तए णं तस्स मेहस्स आसा आसधरा पुरओ पासिं नागा ना

ज्ञाता वृत्तिः
५९

ण धरणिपिउठउरहग सिंहसणओ तते णं से मेहकुमारे अप्पुणयसिंगारे वग्गाहिय वालि
यंटेउस्सवियसे पकत्तेप विंझिय वाजवीयणिए सव्विड्ढीए सव्वबलेणं सव्वसमुदए
णं सव्वादरेणं सव्वविभूईए सव्वविभूसाए सव्वसंभमेणं सव्वगंधपुप्फमल्ला
लंकारेणं सव्वतुरियसद्दसण्णिनाएणं महया इड्ढीए महया जुईए महया बलेणं म
हया समुदएणं महया वरतुडियजमगसमगप्पवाइएणं संखपणवपडहभेरिझ
ल्लरिखरमुहिहुडुक्कमुरवमुइंगदुंदुहिनिग्घोसनाइयरवेणं रायगिहस्स मज्झंम
ज्झेणं णिगच्छइ तते णं तस्स मेहस्स कुमारस्स रायगिहस्स णगरस्स मज्झंमज्झेणं नि
गच्छमाणस्स बहवे अत्थत्थिया कामत्थिया भोगत्थिया लाभत्थिया किब्बिसिया कारो
डिया कारवाहिया संखिया चक्किया णंगलिया मुहमंगलिया पूसमाणवा वद्ध
माणवा ताहिं इट्ठाहिं कंताहिं पियाहिं मणुण्णाहिं मणामाहिं मणाभिरामाहिं हि
ययगमणिज्जाहिं वग्गुहिं ति अथ मस्यार्थः तदनंतरं चक्रछत्रस्योपरि पताकातिप
ताका सचामरोपशोभिता तथा दर्शनरतिदा दृष्टिस्फरवदा आलोकदृष्टिविषये ५९

प्रस्थिता स्फच्चतया सा आलोकदर्शनीया ततः कर्म्मधारयः अथवा दर्शने दृष्टि
पथे मेघकुमारस्य रचिंता धृता या आलोकदर्शनीया यथा सा तथा वातोद्धूता वि
जयसूचिका वया विजयवैजयंती पताकाविशेषः सा तथा सा चउसियाउच्छ्रिता उर्द्ध्वी
कृता पुरतोग्रतः यथानुपूर्वी क्रमेण संप्रस्थिता प्रचलितेति संतत्तिदीप्यमा
नः मणिरत्नानां संबंधि पादपीठं यस्य सिंहासनस्य तत्तथा स्वेन सिंहासकीयेन मे
घकुमारसंबंधिना पादुकायुगेन समायुक्तं यत्तत्तथा कुर्वितः किंकरैः किंकुर्वा
णैः कर्म्मकरपुरुषैः पादातेन च पदातिसमूहेन च शास्त्रपाणिना परिक्षिप्तं यत्त
तथा त्रस्यति कुतपः हयपोत्ति आ लरणकरंतकं मुंडिनो मुंडितो जुटिनो छिहंजि
नो शिखावंतः इसरकराः परस्परेण कलहविधायकाः चाटुकाराः प्रियंवदाः सोहं
तायत्ति क्रोसां कुर्वतः सार्वतायत्ति श्रावयंत आशीर्वचनानि रक्षंतो अन्योन्यं
आलोकं च कुर्वाणाः मेघकुमारं तत्समृद्धिं च पश्यंतः जात्यानां कांबोजादिदेशो
द्भवानां तरो मल्लिनो वलाधायिनो वेगाँधायिनो वाह्यमानाः संवत्सरापे कांते तथा

ज्ञाता वृत्तिः
६०

तेषां अन्येकुसाय उत्तिमन्यां तत्त्रसापजा जाति विशेषा एवेति गमनिकैवेषा
यासां कादंपर्यणकारा अहिसाणानि च कांचिकानि येषां संति ते तथा मल्लयोपात
बासरंगंगनास्तैः परिमंडिता कटी येषां ते तथा तेषां दृपद्दृतानां मनागुत्पाहितत्रि
स्नाणामीन्नस्तानानातिमस्तानां ते द्विजनगपुद्दश्यंतीति ईषन्मनाकुउसंग दृष्टि
देशस्तत्र विस्तीर्णधवलदंताश्च येते तथा तेषां वोशीप्रतिमानेद्विष्योषस्तूर्यनादः
अथवा स्कंदी सत्समृद्धिको घोषो येषां ते तथा तेषां सकिंकिणिसश्रुद्रघंटिकं पज्जा
लंमुक्ताफलादिमयं नेनपरिक्षिप्ता येते तथा तेषां तथा हिमवतानि हिमवत्पर्वतोद्भवा
नि चित्राणि तिनिशास्यवृक्ष विशेषस्य संबंधीनि कनककलियुक्तानि हेमखचितानि दारू
णि काष्ठानि येषां ते तथा तेषां कालायसेन लोहविशेषेण सुष्टु कृतं नेमेर्ज्जडमालायाः
यंत्राणां च रथोपकरण विशेषाणां कर्म येषां ते तथा तेषां सुश्लिष्टे चलन्ति छत्रदंड
वत् मंडले वृत्ते धुरो येषां ते तथा तेषां आकीर्णे वेगगुणयुक्ताः ये वरतुरगाः तैः सुसंप्र द्वि
युक्ता योजिता येषु ते तथा तेषां कुशलनराणां मध्ये ये छेका दक्षाः सारथयः तैः सुसं ६०

प्रगृहीता येते तथा तेषां तोणत्ति शरभस्त्राः सह कंकटैः कवचैः वंडौश्च वर्त्तते ते तथा तेषां ये ने
~~कंसचापांशराणांमध्येयेछेकादक्षाः सारथयः~~ तैः सुसं धनुर्मुक्ता ये शराः प्रहरणानि च
खड्गादीनि आवरणानि तत्र शीर्षकादीनि तैर्भरिता युद्धसज्जाश्च युद्धप्रगुणा ये ते तथा तेषां
लउलत्ति लकुटाः अस्यादिकानि पाठोहंतिमस्य संततथा तच्चेन सज्जं प्रैचप्रगुणं।
युद्धस्येति गम्यते पादातानीकं पदातिकटकं हारावलितं सकृतरतिकं विहितसर्वव
श्लोयस्य स तथा सुकुटदीप्तनिरकः पहरेस्य गमनयाएति गमनाय प्रधारितवान्
संप्रधारितवान् महन्तिमहान्तः अश्वाश्वराः येन्वान्वारयंति नागाहस्तिनः नागधरा
ये हस्तिनो धारयंति क्वचिद्दृष्टयति पाठः तत्राश्वाना गाश्च किंविधाः अश्वावराश्चअश्व
श्वप्रधानाः एवं नागवराः तथा रथसंघेल्लीरथमाला क्वचित् रहसंगल्लीतिपाठः
तत्र रथसंगेल्ली रथसमूहः तएणं से मेहेकुमारे अब्भुग्गयसिंगारे इत्यादि वर्णकोपसं
हारवचनमिति न पुनरुक्तं सच्चिट्ठीए इत्यादि दोहदावसरे व्याख्यातं शंखः प्रतीतः प
णवो लघुपटहः पटहस्तु प्रतीत एव भेरी ढक्का झल्लरी वलयाकारा खरमुही का

इत्याकुडुक्का प्रतीता महाप्रमाणो मर्द्दलो मुरजः स एव लघुर्मृदंगो डुंडुक्तिरेर्याकारः सक
टप्रमुखी एतेषां निर्घोषो महाध्वानो नादितं च घंटायामिव वादनोत्तरकालभावी
सततध्वनिस्तल्लक्षणो यो रवस्तेन अर्थार्थिनो द्रव्यार्थिनो कामार्थिनः शब्दरूपा
र्थिनः भोगार्थिनो रसस्पर्शार्थिनः लाभार्थिनः सामान्येन लाभेप्सवः किल्बि
षिका पातकफलवंतो निःस्वान्ययंत्वादयः कारोटिकाः कापालिकाः करो राजदे
यं द्रव्यं न ददंतीति ये ते कारकाः करेण वा बाधिताः पीडिता ये ते करबाधिताः शंख
वादनशीला ये ते शांखिकाः शंखो वा हस्ते येषां मंगल्यं चंदनास्थैते धारयंतीत्वा शं
खिकाः चक्रं प्रहरणमेषामिति चाक्रिकाः योद्धारः चक्रं घास्ति येषां ते चाक्रिकाः
कुंभकारतैलिकादयः चक्रं चोपदर्श्य याचंते ते चाक्रिकाः चक्रधराः इत्यर्थः लां
गलिकाः लांगलं वा प्रहरणं येषां लांगलं गलेवालंबमानं सुवर्णादिमयं नद्धं येषां ते
लांगलिकाः कार्पटिकविशेषाः मुखमांगलिकाः चाटुवचनानि ये कुर्वंति
ते मुखमांगलिकाः पुष्यमाणवा नग्नाचार्याः वर्द्धमानकाः स्कंधाः शपितपुरु ६१

षाः इत्यादि पूर्ववत् निययविग्घो विययमाहिति इहैवं संबंधः अपि च
जितविघ्नस्त्वं देव अथवा देवानां सिद्धिं मध्ये वस आत्मा निहणाहित्ति विनाशा
य रागद्वेषमल्लौ केन करणेनेत्याह तपसा अनशनादीना किं भूतः सन् धृत्या
चित्तस्वास्थ्येन माधणियंति अत्यर्थपाठांतरेण बलिया दृढं बद्धकक्षायेन स तथा
मल्लं हि प्रतिमल्लो मुष्टयादिना करणेन वस्त्रादिदृढबद्धकक्षो यस्सन्निहंतीति ए
वमुक्तमिति तथा मर्द्दय अष्टकर्मशत्रून् ध्यानेनोत्तमेन शुक्लेनाप्रमत्तः सन्
तथा पावय पत्ति पाऊहि वितिमिरं अपगततमोज्ञान निति तिमिरुपटलं नास्मादुत्त
रमस्तीति अनुत्तरं केवलज्ञानं गच्छ च मोक्षं परं पदं त्रैलोक्य अवतमचलं चेत्येवं चका
रस्य संबंधः किं कृत्वा परिषहसैन्यं हणमित्यलंकारे अथवा कथं भूतः सन् हंता वि
नाशकः परीषहचमूनां हंता पुत्ते इति धारिण्यपेक्षया श्रेणिकस्य वा पुत्रत्वात्
जीवितोच्छ्वासका हृदयं नंदिजनकः उंबरपुष्पमिति गानी लोकस्य लंपमिमिति यादि
त्यबोधकं कुमुदमिति वा चंद्रबोधकं जेइय घमित्यादि प्राप्तेषु संयमयोगेषु यत्नः

ज्ञा.ता.वृत्तिः कार्यो हे जातपुत्र घटितव्यम् प्राप्तमघटना कार्या पराक्रमितव्यं पराक्रमः कार्यः पु
६३ रुषत्वाभिमानः सिद्धफलः कर्त्तव्य इति भावः किमुक्तं भवति एतस्मिन्नर्थे प्रव्रज्या
पालने प्रमादयितव्यमिति आदीप्तः प्रदीप्तः प्रकर्षेण आदीप्त प्रदीप्तेस्येत प्रदी
प्त इति भावः गाहावइत्ति गृहपतिः झियमाणंसित्ति ध्मायमाने भांडे भंडं हिरण्या
दि अप्पसारं पाठांतरे अप्पं च तत्सारं चेति अप्पसारं मुल्लगरुयं आयाए त्ति
आत्मना एगंतं पुरा यत्ति पश्चादागामिनि काले पुरा च पूर्वमिदानीमेव लोके
आगामिजन्मनि पुरा लोके इहैव जन्मनि पाठान्तरे पच्छाउरस्सत्ति पश्चादग्नि
भयोत्तरकाले आतुरस्य बुभुक्षादिभिः पीडितस्येति एगे भंडेत्ति एकमद्वि
तीयं भांडमिव भाजनं सयमेव त्यादि स्वयमेव प्रव्राजितुं वेषदानेनात्मानमि
ति गम्यते भावेयाक्रमत्यपः प्रव्राजमित्यर्थः मुंडितं शिरोलोचनेन सेवितं
शिक्षादिनं प्रत्युपेक्षणादि ग्राहणतः शिक्षितं सूत्रार्थग्राहणतः आचारो
ज्ञानादिविषयमनुष्ठानं कालाध्ययनादि गोचरो भिक्षाटनं विनयः प्रतीतो ६३

वैनयिकं तत्फलं कर्म क्षपादि चरणं व्रतादि करणं पिंडविशुद्ध्यादि यात्रा संयम
यात्रा मात्रा तदर्थमेवाहारमात्रं ततो द्वंद्वः ततः एषां आचारादीनां वृत्तिर्वर्त्तनं य
स्मिन्नसौ आचारगोचरविनयवैनयिकचरणकरणयात्रामात्रावृत्तिकस्तं
धर्ममाख्यातमभिहितं ततः श्रमणो भगवान् स्वयमेव प्रव्राजयति यावद्धर्मामा
ख्यातिकमित्याह एवं गंतव्यं युगमात्रन्यस्तदृष्टिनेत्यर्थः एवं चिट्ठियव्वंति
एवं स्थे ऊर्द्धस्थानेन स्थातव्यं एवं निषत्तव्यमुपवेष्टव्यं संदंशकभूमिप्रमार्ज
नादिन्यायेनेत्यर्थः एवं त्वग्वर्त्तितव्यं शयनीयं सामायिकाद्युच्चारणपूर्वकं
शरीरप्रमार्जनां विधाय संस्तारकोत्तरपट्टयोर्बाहूपधानेन वामपार्श्वत इ
त्यादिना न्यायेनेत्यर्थः भोक्तव्यं वेदनादिकारणतो अंगारादिदोषरहित
मित्यर्थः भाषितव्यं हितमितमधुरादिविशेषणतः एवमुत्थायोत्थाय प्रमा
दनिद्राव्यपोहेन विबुध्य प्राणादिषु विषये यः संयमो रक्षा तेन संयंतव्यं य
तितव्यमिति तत्र प्राणाः द्वित्रिचतुः इन्द्रिया भूतास्तरवः स्मृताः जीवाः पंचेंद्रि
याः शेषाः सत्वा उदीरिताः किंबहुना अस्मिन् प्राणादिसंयमेन प्रमादयित

अणुपमएवकार्यइत्यर्थः पश्चपराह्णकालसमयो विकालः आहाराईणि याए
त्ति यथारत्नाधिकतया यथाज्येष्ठमित्यर्थः शयनं तदर्थं संस्तारकस्तन्मयः अ
थवा शय्यायां वसतौ संस्तारकाः वायणाये वाचनार्थं धर्मार्थमनुयोगस्य चि
ताधम्मानुयोगचिंता तस्यै अतिगच्छंतः प्रविशंतो निर्गच्छंतश्चालयादिति
गम्यते उल्लंघिंतित्ति उल्लंघयंति पोलिंडिंतिप्रकर्षेणोल्लंघयंतीत्य
र्थः पादरजोलक्षणेन रेणुना पादरयाद्वा तदुद्गतेन रेणुना गुंडितो यः स तथा तेक्कु
र्वंति एमहालियं वलंरयसित्ति इति महती चरंनती यावदिति शेषः मेघकुमारे
णं संचाएतित्ति नशक्नोति क्षणमप्यक्षि निमीलयितुं निद्राकरणायेति आ
ध्यात्मिकः आत्मविषयश्चिंतितः स्मरणरूपः प्रार्थितः अभिलाषात्मकः
मनोगतः मनस्येव वर्त्तते यो न बहिः सतच्वाकल्पो विकल्पः समुत्पन्नः
आगारमेहमध्यादसामि * अधितिष्ठामि पाठांतरतो आगारमध्ये अव
सामि आढंति आद्रियंते परिज्ञानं नियुक्ता यमेवंविधइति सक्कारयंति
सत्कारयंतो वस्त्रादिभिरभ्यार्चयंतो वेत्यर्थः सम्मानयंति उचितप्रतिपत्ति ६३

करणेन अर्थान् जीवादीन् हेतून् तद्गमकानन्वयव्यतिरेकलक्षणान् प्रश्नान्
पर्यनुयोगान् कारणानुपपत्तिमात्राणि व्याकरणानि परेण प्रश्ने कृते उत्तराणी
त्यर्थः आघ्यांति आलपंति ईषत् संलपंति मुहुर्मुहुः अदुत्तरं चणंति अ
थापरं एवसंपेहेतित्ति संप्रेक्षते पर्यालोचयेचेति अट्टदुहट्टवसट्टमाणसगए
त्ति आर्त्तध्यानविशेषेण दुःखार्त्तः दुःखपीडितं वशार्त्तं विकल्पवशमुपग
तं यन्मानसं तद्गतः प्राप्तो यः स तथा निरयप्रतिरूपकां नरकसदृशीं दुःख
साधर्म्यात्तां रजनीं क्षिपयति गमयति मेहाइति मेघ इति एवमसिलप्पमहावी
रस्समगवदीत सेणूणमित्यादि इति नूनं मेघ अस्ति एषो र्थः हंत इति खेदे को
मलामंत्रणे स्येवार्थः इति मेघ नो त्तरमद्याथि वनचरकैः शबरादिभिः सं
ख्येत्यादि विशेषणं प्रागिव सत्तुस्सेहे सप्तहस्तोच्छ्रितः नवायतो नव हस्ता
यतः एवं दशहस्तपरिणाहो मध्यभागे सप्तांगानि पादकरपुच्छलिंगलक्षणा
मो नि प्रतिष्ठितानि उ यस्य स तथा समोऽविषमगात्रः कसंस्थितो विशिष्टसंस्थानः

ज्ञातावृत्तिं पाठान्तरेण सोम्य संमिद्दतः तत्र सोम्यो रौद्रको रोगनी रोगो वा संमितः प्रमाणोपेतां
६४ गः पुरतोग्रतः उदग्रः उच्चः समुच्छ्रितशिराः शुभानि सुखानि आसनानि स्कंधा
दीनि यस्य स तथा पृष्ठतः पश्चाद्भागे वराह इव शूकर इव वराहो वनतत्वात् अजि
काया इवोन्नतत्वात् कुक्षी यस्य स तथा अच्छिद्रकुक्षि र्मांसलत्वात् अलंब
कुक्षिरुपलक्षण वियोगात् अलंबलंबोयरहरकरेत्ति अलंबं च लंबं च क्रमे
ण दरं च जठरं अधरकरो चौष्ठहस्तो यस्य स तथा पाठान्तरेण प्रलंबोदरस्येव
गणपतेरिवाधरकरो यस्य स तथा धनुःपृष्ठाकृतिः आरोपितधनुराकारं
विशिष्टं प्रधानं पृष्ठं यस्य स तथा आलीनानि स्फ्लिष्टानि प्रमाण युक्तानि व
र्त्तितानि वृत्तानि पीवराण्युपचितानि गात्राणि अंगानि अपराणि वर्णितगात्रे
भ्योन्यानि अपरगात्राणीति वा यस्य स तथा अथवा आलीनादि विशेषणं गात्र
मुरः अपरश्च पश्चाद्भागो यस्य स तथा वाचनान्तरे विशेषणद्वयमिदं अ
भ्युद्गता उन्नता मुकुल मल्लिकेव कोरकावस्थ विचकिल कुसुमवत् धव ६४

लाश्च दंता यस्य सो भ्युद्गतमुकुलमल्लिकाधवलदंतः आनामितं यच्चापं धनुस्तस्येव
ललितं विलासो यस्याः सतथा सा च संवेल्लिता च वेल्लिता संकोचिता अग्रशुंग शुं
डाग्रं यस्य स आनामितचापललितसंवेल्लिताग्रसुंडः आलीनप्रमाणयुक्तपुच्छः
प्रतिपूर्णाः सुचारवः कूर्म्मवच्चरणा यस्य स तथा पांडुराः शुक्लाः सुविशुद्धाः नि
र्मलाः स्निग्धाः कांता निरुपहताः स्फोटादिदोषरहिताः विंशतिर्नखाः यस्य स तथा त
त्र त्वं हेमेघवकुत्ति इस्थ्यादिभिः सार्द्धं संपरिवृतः आधिपत्यं कुर्वन् विहरसीति सं
बंधः तत्र हस्तिनः परिपूर्णप्रमाणा लोट्टकाः कुमारावस्थाः कलभाः बालका
वस्थाः हस्तिसहस्रस्य नायकः प्रधानं न्यायदो वा देशकोहितमार्गादेः प्राकर्ष
कोग्रगामी प्रस्थापको विविधकार्येषु प्रवर्त्तको यूथपतिः तत्स्वामिवृंदपरिव
र्द्धकस्तद्वृद्धिकारकः सदं पलिपत्ति सदाप्रललितः प्रक्रीडितः कंदर्परतिः क
लिप्रियः मोहनशीलो निधुवनप्रियः अवितृष्णो मोहनेणानुपरतवांछः स
थासामान्येन कामभोगतृषितः गिरिषु च पर्वतेषु दरीषु च कंदरा विशेषेषु कु

द्रहेषु पर्वतान्तर्गलेषु कंदरास्च गुहास्च उज्झरेषु च उदकप्रपातेषु निर्झरेषु च
स्यंदनेषु विदरेषु च कुहरकनघाकारेषु नदीपुलिनस्य स्यंदरेषु गर्त्तरूपेषु वाग जं
र्त्तास्च प्रतीतास्च पल्वलेषु च प्रह्लादनन्नालेषु विह्वालेषु च बिरकलमिश्रेषु कू
टकेषु च पर्वततटेषु कूटकपल्वलेषु च पर्वततटव्यवस्थितजलाश्रयविशेषे
षु तटीषु नद्यादीनां तटेषु वितटीषु च तास्चैव विरूपास्च अथवा वियद्भिरामश्चैन
नो केटवीउत्पत्तटंकेषु च एकदिशि छिन्नेषु पर्वतेषु कूटेषु च अधोविस्तीर्णेषु
परिसंकीर्णेषु द्वत्तपर्वतेषु हस्त्यादिबंधनस्थानेषु वा शिखरेषु च पर्वतोपरिव
र्त्तिकूटेषु प्राग्भारेषु च ईषदवनतपर्वतसागेषु मंचेषु च स्तंभन्यस्तफलकमये
षु नद्यादिलंघनार्थेषु मालेषु च स्वापदादिरथ्थार्थेषु तद्विशेषेषु वमं वमा
लकाकारेषु पर्वतदेशेष्वित्यन्ये काननेषु च स्त्रीपथस्यचैकतरस्य भोग्ये
षु च नविशेषेषु अथवायस्मात् पर्वतोटवी भवति तानि काननानि शीर्ण वृ
क्षाणि यानि तेषु वनेषु च एकजातीयवृक्षेषु वनखंडेषु वानेकजातीयवृक्षाणां पंक्तिषु ६५

नदीषु च प्रतीतास्चं नदीकच्छेषु च तडागेषु च वातपादिरूपाश्रयेषु संगमेषु च नदी
मीलकेषु वापीस्च च चतुरस्रास्च पुष्करिणीषु च वर्तुलास्च पुष्करवतीषु वा दीर्घिका
स्च वक्रानुसारणीषु गुंजालिकास्च वक्रसारणीषु सरस्च जलाशयविशेषेषु स
रःपंक्तिकास्च च यास्च सरःपंक्तिस्च एकस्मात्सरसोन्यस्मिन्नन्यस्मादन्यत्रैवं सं
चारकपाटकेनोदकं संचरति तास्च बहुविधास्तरूपका वा: प्रचुराणि पानीयत्वणानि च
य स्य भोग्यतया सर्वथा निर्भय: शूरत्वात् निरुद्विग्न: सदैव अनुकूलविषयप्राप्ते: स
खं सुखेनाकृत्रेण पाउसे त्यादि प्रावृट् आषाढश्रावणौ वर्षा रात्रो भाद्रपदआश्वयुजौ
शरत् कार्त्तिकमार्गशीर्षो हेमंतः पौषमाघो वसंतः फाल्गुनचैत्रौ एतास्च पंचस्च
ऋतुषु समतिक्रान्तेषु जह्यामूलमासेत्ति ज्येष्ठमासे पादपघर्षसमुच्छितेन शुष्कतृण
शुष्कतृणपत्रलक्षणं कचवरं मारुतस्चवतयो: संयोगेन दीप्तो य:सततपातेन महा
भयंकरेण भितयकारिणा कृतवहेनाग्निना योजनिततदति कृरूपस्य वनदवाग्ना व
नैग्नि स्तस्य ज्वालास्ति: संप्रदीप्ता ये ते तथा तेषु स स्च अथ पाय व धं स समुद्दिण्णम्मि

त्वादिषु णं कारणं वाक्यालंकारार्थत्वात् सप्तम्येकवचनं ते त्याख्येया तथा धूमा
कुला सर्वदिक्षु तथा महावायुवेगेन संघट्टितेषु छिन्नज्वलेषु त्रुटितज्वालासमूहेषु
आपतत्सु सर्वतः संपतत्सु तथा पोल्लरुक्खेसु त्ति शुषिरवृक्षेषु अंतरंतर्मध्ये ध्मा
यमानेषु दह्यमानेषु तथा मृतैर्मृगादिभिः कुथिताः कोथमुपनीताः विनष्टाः विग
तस्वरूपाः किमिणकद्दमत्ति क्रिमिचकर्दमाः नदीनां विदरकाणां च क्षीणपा
या अंताः पर्यंता येषु क्वचित् किमियत्ति पाठः तत्र मृतैः कुथिताः विनष्टक्रमि
कर्दमाः नदीनां विदरकाणां लक्षणक्षीणजललक्षणया स्थानीयांतानि जलाशया ये
षु ते तथा तेषु वनविभागेषु सत्सु तथा भृंगारकाणां पक्षिविशेषाणां दीनः
क्रंदितरवो येषु ते तथा तेषु वनांतेष्विति सौ वैव वर्त्तते तथा परपुरुषमतिकर्कश
मनिष्टं च रिष्टानां काकानां व्याहृतं शब्दितं येषु तथा विद्रुमाणीव प्रवालानीव लोहि
तानि अग्नियोगात् पत्रनयोगाद्वा अग्राणि येषां ते विद्रुमाग्रास्ततः पदद्वयस्य क
र्मधारयः ततस्तेषु मार्गेषु महावृक्षाग्रेषु वृक्षोन्नतेषु सत्सु बाचनान्तरे खरपरुष ६६

रिष्टव्याहृतानि विविधानि द्रुमाग्राणि येषु ते परपुरुषरिष्टव्याहृतविद्रुमाग्रास्तेषु
वनांतेष्विति तथा तृष्णावशेन मुक्तपक्षाः श्लथीकृतपक्षाः प्रकटितजिह्वातालु
काः असंपुटिततुंडाश्च असंवृतमुखाः ये पक्षिसंघास्ते तथा तेषु ससंतेसुत्ति
श्च सत्सु खासंमुच्चत्सु सत्सु तथा ग्रीष्मस्य ऊष्मा च उष्णता उष्णताउष्मा पात
श्च रविकरसंतापः खरपरुषचंडमारुतश्च अतिकर्कशप्रबलवातः सुष्क
तृणपत्रकचवरप्रधाना वातोली वेति द्वंद्वः ताभिर्भ्रमंतो नवस्थिताद्धृताः संभ्रा
न्ताये श्वापदाः सिंहादयस्तैराकुलेयेते तथा मृगतृष्णामरीचिका तल्लक्षणो बद्धश्चि
न्हपट्टो येषु ते तथा ततः पदद्वयस्य कर्मधारयः ततस्तेषु सत्सु गिरिवरेषु पर्व
तराजेषु तथा संवर्त्तिकितेषु संवर्त्तेषु त्रस्ता उत्ताता ये मृगा पसवाश्वापदत्ये च
तुष्पदविशेषाः सरिसृपाश्च गोधादयस्तेषु ततश्चासौ इस्ती अवदारितवदन
विवरो निर्लालिताग्रजिह्वश्च यः इति कर्मधारयः महंततुंबइयपुन्नकन्नोत्ति
महांतौ तुंबकितौ नयाद्दरघट्टतुंबाकारीकृतौ स्तब्धावित्यर्थः पुण्णोव्याकुल

तथा शुष्कं हस्तप्रवलौ कर्णौ यस्य स तथा कुंचितः घोरत्ति रूक्षः पीवरो महान् रवो
यस्य स तथा उच्छिन्न लांगूलः पण्णयामह्वा तथा निर्वृत्तं पैतापिकं तद्विधं यद्भिरमरडि
तं तल्लक्षणेन रवेण स्फोटयन्निवांबरतलं पादपातेन कंपयन्निव मेदिनीतलं मिथ्या
दिकंपयं दिसोदिसिंति दिक्षुचापादिक्षु चापविपलायितवान् आतुरो व्याकुलः झुं
झिए बुभुक्षितः दुर्बलः क्लांतो ग्लानः नष्टश्रुतिको मूढदिक्कः परज्झाहएत्ति परास्मो
ह्यो बाधितो भीतो जातभयः त्रस्तो जातत्रासः उसिएत्ति शुष्कः आनंदरसशो
षात् उद्विग्नः कथमितो नर्थान्मोक्ष्ये इत्यध्यवसायवान् किमुक्तं भवति संजात
भयः सर्वात्मनोत्पन्नभयः आधावमानः ईषत्परिधावमानः समंतात् पाणि
पाएत्ति पानं पायः पानीयस्यपायः पानीपायः तस्मै जलपानायेत्यर्थः सेयं
सि विसण्णेत्ति पंके तिमग्नः कायपच्चुद्धरिस्सामीकृत्वा कायमुद्धर्तुं परश्चइ
त्तिशेषः बलियतरायं तिगाढं तरं तएणमित्यादि इहैवमक्षरघटना लयाइमे
घ एको गजवर युवा करचरणे दंतमुशलप्रहारैर्विप्रारब्धो विनाशयितुमितिगा ६७

म्यते विपराहोवाहतः सन् अन्यदा कदाचित् स्वकाद्यूथात् चिरं निर्घाटइत्ति निर्द्धा
रितो यः स पानीयपायाय तमेव महाहृदं समवतरति स्मेति आसुरुत्तेत्ति स्फु
रितकोपलिंगः रुष्ट उदितक्रोधः कुपितः प्रवृद्धकोपोदयः चांडिक्कितः संजा
तचांडिक्यः प्रकटितरौद्ररूप इत्यर्थः मिसिमिसीमाणेत्ति कोपाग्निना देदीप्य
मान इव एकार्थिका चैते शब्दाः कोपप्रकर्षप्रतिपादनार्थं नानादेशजविनेयानु
ग्रहार्थं च उठन्नइत्ति अपवृष्टस्यातिविध्यतीर्थः निघाएइति निर्घातयति समाप
यति वेदनाकिंविधा उज्वला विपक्षलेशेनापि अकलंकिलविपुला शरीरव्या
पकत्वात् कच्चित्विउलेत्ति पाठस्तत्र त्रीनपि मनोवाक्कायलक्षणान् र्थांस्तुल
यति तुल्या रूढा जिह्वचां करोतीति त्रितुला कर्कशा कर्कशद्रव्यमिवानिष्टेत्यर्थः
प्रगाढा प्रवर्द्धिता चंडा रौद्रा दुःखरूपा न सुखेत्यर्थः किमुक्तं भवति दुरधिस
ह्या दाहवक्कतिपत्ति दाहो व्युत्क्रांत उत्पन्नो यस्य स तथा स एव दाहव्युत्क्रांति
कः अट्टवसट्टदुहट्टेत्ति आर्त्तध्यान वशृतागतो मृतो गतो दुःखार्त्तश्च यः

ज्ञातावृत्तिः सतथा जपाकुसुमसश्च अरुणपाणिजातश्च वृक्षविशेषो लाक्षारसश्च सरसकुं
६९ कुमंच संध्याभ्ररागश्चेति द्वंद्व एतेषामिव वर्णो यस्य स तथा गणियारत्ति गणि
काकाराः सकामायाः कारणवस्तासां कोकंतिउकेर्देशीपदत्वाद्दत्तो यस्य कामक्री
डापरायणत्वात्स तथेत्यर्थस्तथा इहचैवसमासो द्रष्टव्यः कालधम्मुणत्ति कालमरणं
सएन धर्मो जीवपर्यायः कालधर्मः णिच्चेत्तिय नामधेये इह यावत्करणेन यद्यपि
समग्रः पूर्वोक्तो हस्तिवर्णकः सूचितस्तथापि श्वेततादिवर्णो द्रष्टव्यः इहारक्तस्य व
र्णितत्वात् एवागेसउ हस्से हे इत्यादि कमतिदेशं वक्ष्यंति यत्पुनरिह द्रश्यते स
त्तंगेत्यादि तद्वाचनान्तरवर्णकापेक्षं कुलिखितमिति लेसाहीत्यादि लेशालेश्या
द्यन्यतरत्रैरूपं प्राप्तस्येत्यर्थः अध्यवसानं मनसि परिणतिः परिणामो जी
वपरिणतिः जातिस्मरणावरणीयानि च कर्माणि मतिज्ञानावरणभेदाः
क्षयोपशम उदितानां क्षयोनुदितानां विष्कंभितोदयत्व ईहासदर्थाभिमुखो
वितर्क इत्यादि प्राग्वत् संज्ञिनः पूर्वजातिः प्राक्तनं जन्मान्तरं तस्यापलस्मर ६९

णंत संज्ञिपूर्वजातिस्मरणअस्तनिर्देशो तु संज्ञी पूर्वो भवो यत्र तत्संज्ञिपूर्वं संज्ञा
तिविशेषणं स्वरूपं ज्ञापनार्थं तद्धि संज्ञिनामेव विषयं स्मारणमुद्यत इति स्मर
णावरणीयानि कर्माणि मतिज्ञानावरणानि अवबुध्यसे प्रत्यपराह्णः तएणमि
त्यादिको ग्रंथो जातिस्मरणविशेषणमाश्रित्यावर्त्तितः दवग्गिसंजायकारणंड
त्ति दवाग्नेः संजातस्य कारणस्य तयोर्हेतो निवृत्ते ये इदं दवाग्निसंजातकारणेर्थ
~~...~~ दृष्टस्य निर्दृत्यर्थत्वात् क्वचिद्दवग्गिसंताणकारणंडत्ति दृश्यते त
त्रदवाग्निसंत्राणकारणायेति व्याख्येयं मंडलं घाएसित्ति वृक्षाद्युपघातेन तत्कारा
पीत्यर्थः एकवेवत्ति कृप्रेस्वनिशः ग्राम्यामाकृणियाएत्ति प्रकंप्य प्रकंप्य व
लयित्वेत्यर्थः उद्धवेसित्ति उद्धरसि एडिसित्ति छर्दयसि दोच्चंति द्वितीयं तस्यैव
मंडलस्य घातं एवं तती यम्मि त्ति नलिनीवनविधवनकरे इ इविषवनं विनाश
हेमंतित्ति शीतकाले कुंदाः पुष्पजातिविशेषाः लोध्रश्च वृक्षविशेषस्तश्च शी
तकाले पुष्प्यत्यतस्ति उद्धता पुष्पसमृद्ध्या उकुराइय यत्रस तथा तुषारं हिमं त

ताता सः द्द ६९ स्तै स्त्र चुरं यत्र स तथा ततः कर्मधारय ततस्तत्र ग्रीष्मे उष्णकाले विवर्तमानो विचरन् वनेषु
वरकरेणूनां तास्तिर्वा विविधा दिसन्ति इत्ता कज प्रसवैः पद्मकुसुमै र्घाताः प्रहारा येनयः
स्य वासस्तथा करेणू विविद्य मकयपस्कधा उत्ति पाठान्तरे नु वनरेण वोवनकास्तेव
शीतकाले पुष्पं त्यतस्ते उद्भता पुष्पपांसवो विधमनेवृधादिन्तातिदृत्ता दिग्स्वात्मनिव
कृष्णपरतया क्षिप्ता येन स तथा क्रीडयैव कृताः प्रशुघाता येन स तथा ततः पदद्व
यस्य कर्मधारयः कुमुंतिन्वां तथा कुसुमैः कृतानि यानि चामरचन्त कर्णपू
राणि तैः परिमंडिता अतिरामश्चयः स तथा क्वचित् उद्दयः कुसुमन्तिपाठः
तत्र कुतुज कुसुमैरिति ~~पाठ~~ः व्याख्येयं तथा मदद्वयेन विकसंति कटतटानि
गंडतटानि क्लिन्नानि आर्द्रीकृतानि येन तथा तच्च गंधमदद्वरिवेतन स्फुर
सिर्जनितगंधः मनोज्ञकृतगंधः करेणुपरिवृतः कृतुत्तिः समासा वा परिपू
र्णा जनिताशोभा यस्य स तथा काले किंभूते दिनकर प्रचंडो यत्र स तथा तत्र
परिशोषितानि रसिका ताः तरुवराः श्रीधराः शोसायंता येन परिशोषिता ६९

तरुवराणां वाश्रीः संपद्धरायां च विये न पाठांतरे परिशोषितानि तरुवराणि येन स तथा स चासौ सीमंतरदर्शनीयश्चेति तत्र स्तंगाराणां पक्षिविशेषाणां र
व कुर्वतां स्वैरवो सीमोरवः शब्दो यस्मिन् स तथा तत्र नानाविधानि पत्र काष्ठत
णकचवराण्यध्वनि उत्पाटितानि येन स तथा स चासौ प्रतिमारुतश्च प्रतिकूल
वायुस्तेन आदिग्ध व्याप्तं नभस्तलं व्योमपटुप्रमाणेति पटुत्वयुपकारि यस्मि
न् पाठान्तरे उक्तविशेषणेन प्रतिमारुतेनादिग्धं नभस्तलं नगगणश्च य
स्मिन् स तथा तत्र वातोल्या वात्यदारुण तीव्रः स तथा तत्र तृष्णावशेन ये
दोषा वेदनादयस्तैर्दोषिता जातदोषा दूषिता वा स्वम्मंतो विविधा ये श्वापदाः
ते स्समाकुलो यः स तथा तत्र सीमया पावत्यैवं दृश्यते यः स सीम दर्शनीयः
स तत्र तस्मिन्नेवं दारुणे ग्रीष्मकेनेत्याह मारुत वशात्तयः प्रसरः प्रसरणं तेन प्रस
तो विजृंभितश्च प्रबलो स्तलोयः स तथा तेन वनदवेनेति योगः अत्यधिकं य
या तवत्यैव सामसेर्दवोति सीष्मोर वप्रकारो यस्य स तथा तेन मकरया यत्प

ज्ञाता सू. वृ. त्ति तं पतनं तेन निरिक्तस्तेन उद्धाव्यमानः प्रवर्द्धमानो धनधगायमानो ज्वालज्वलमा
७० नो संदीप्त तश्च दह्यमानदारुसंपद प्रबलः प्रायं तरंगाष्टोद्धतश्चयः स तथा तेन दि
सन्तरोयः सस्फुलिंगश्च तेन धूममालाकुलेनेति प्रतीतं श्वापदशतांतःकरणेन
तद्विनाशकारिणा ज्वालालिंगालोपितः कृताछादनो निरुद्धश्च विवक्षित दिग्ग
मनेति वा गितो धूमजनितान्धकारद्रुतश्चयः स तथा आत्मानानमपालयती
त्यात्मपालः प्राणान्तरेण आपत्यालोपयति तत्र आतपालोकेन कृतवंदनाप
दर्शनेन महान्तो लुंबकितो स्तब्धतया आरघट्टतुंबाकृती कृती तुंतौ ससंल
मो कर्णौ यस्य स तथा आकुंचित स्थूलपीवरकराकारः तयवशेन सजंतीदिश
इति गम्यते दिशेनेनयनेयस्य स तथा आकुंचिय थोरपीवरकरसोयत्स च
तयंतद्दित्त नयणे त्ति पाठांतरेण तत्रासोगा विस्तरः सर्वा दिशो त्रजंती दिसे
नयने यस्येति वगेन महामेघ इव वातनोदितें महारूपः किमित्याह येनय
स्यां दिशि कृतो विहित स्तेन त्वया पुरापूर्वं दवाग्नि सयास्तीतहृदयेन अपग ७०

तानि तणानि ते षामेव च प्रदेशान्मूलाद्यो वयवा वृक्षाश्च यस्मात् प्रयोगात् तण
प्रदेश वृक्षः को सो वृक्षो दृश्यः वृक्षप्रधानो ल्ल मरेक्ख दृक्षो देशो ह्रस्वो देशो वा किम
र्थं दवाग्निसंत्राणकारणार्थं दवाग्निसंत्राणहेतु रिदं तव त्वि येत द र्थं तथा ये
नेवयस्य स्वमेव दिति मंडलं तेनैव तत्रैव प्रधारितवान् गमनाय कथं वक्रेत्यि ह
त्यादि स्तिः स्ताद मित्य यमे कोगमः यस्तुनतण्णं तुमं मेहा असिया कुयाई कमे
णं पंचसु इत्यादि दृश्यते तद्गुमांतरमन्या मेह तच्चेवं दृश्यं तचापि मेडलंधायं
करेसि जाव सकाइं सुहेणं विहरसि तए णं तुमं मेहा अण्णयाकयाइं पंचसु उऊसु अति
क्कंतेसु इत्यादि यावत् जेणेव मंडले तेणेव पहारेत्थ गमणाए त्ति सिंहादयः प्रतीताः
नवरं वृकादि रुक्ताः द्वीपिकाश्चित्रकाः अच्छ ति ऋक्षाः तरक्षा लोकप्रसिद्धः परा
शराः शरभाः शृगाल विरालशुनकाः प्रतीताः कोलाः शूकराः शशकाः कोकंतिकाः
लोमटकाश्चित्रा चिल्ललका आरण्य जीवविशेषाः एतेषां मध्येऽधिकृतवा
वनास्यां कानि चित्र दृश्यते अग्नि भयविद्रुताः अग्निभयाभिभूताः एगउत्ति

ज्ञा॰सूत्र वृ॰ एकतो बिलधर्मेण बिलाचारेण यथैकत्र बिले यावंतोमत्कोटकादयः संमांति
७१ तावंति तिष्ठंति एवं तेपीति ततस्त्वयाहे मेघगात्रेण गात्रं कंडूयिष्यामि इति हेतोः
पादोनिक्षिप्तः उत्पाटितः तस्सिं च णं अंतरंसितस्मिंश्चावान्तरे पादाक्रान्तपूर्वे अं
तरालेइत्यर्थः पाइं णिक्खिविस्सामित्ति कट्टु इह एवं निरूपयन्निति शेषः प्राणा
नुकंपयेत्यादिपदचतुष्टयमेकार्थं दयाप्रकर्षप्रतिपादनार्थं णिक्खित्ते त्ति नि
क्षिप्तस्य कायेजातइत्यर्थः उपरतोऽनालिंगितेंधनाग्निवत् उपशान्तोज्वा
लोपशमात् विध्यातो गाढमुर्मुरवत् चापीतिसमुच्चये जीर्णइत्यादिशि
थिलीवलिप्रधानायत्वेकतयापिनद्धं गात्रं शरीरं यस्य सः तथा अस्थामाश
रीरबलविकलत्वात् अबलोवष्टंभवर्जितत्वात् अपराक्रमः निष्पादित
फलाभिमानविशेषरहितत्वात् अवंकमणतावावाफ्फोमेत्ति ऊर्द्धस्थाने
नस्थितगात्रइत्यर्थः रेययगिरिपब्भारेत्ति इह प्राग्भार ईषदवनतं देनवेरखं
डं उपमावानेनास्य महत्त्वयेवनवर्णतो रूक्षत्वात्तस्य वाचनांतरेतु सित ७१

एवासावित्ति अपडिलद्धसम्मत्तरयणलंभेणंति अप्रतिलब्धो असंजात
विपुलकुलसमुद्भवेणमित्यादौ णंकारो वाक्यालंकारे निरुपहतंशरीरं यस्य
सतथा दान्तानि उपशमं नीतानि प्राक्काले लब्धानि संति पंचइंद्रियाणि येन
सतथा ततः कर्मधारयः पाठान्तरे निरुपहतशरीरप्राप्तश्वासोलब्धपंचेंद्रि
यश्चेति समासः एवमित्यनेनपजससमानरूपेण स्थानादिति संयुक्तोयः सतथा
तत्र उत्थानं चेष्टाविशेषः बलंशारीरं वीर्यंजीवप्रभवं पुरुषकारोअभिमान
विशेषः पराक्रमः सएव साधितफलइति णोसम्यक्सहिष्येतयस्तावेन कंमसेज्ञो
धस्तावेन तितिक्षसेहेन्यानवजेवनः अध्यासयसि अविचलितकायतया
एकार्थिकानि चैतानिपदानि तस्यमेघस्यानगारस्य जातिस्मरणं समुत्प
न्नमितिसंबंधः समुत्पन्ने च तत्र किमित्याह एतमर्थं पूर्वोक्तं सम्यक्सम्य
क् अभिसमेहित्ति अभिसमेति अवगच्छतीत्यर्थः संजायपुव्वजाईसर
णेत्ति संस्मरितं पूर्वजात्याः प्राक्तनजन्मनो संबंधिस्मरणं यस्य सः पूर्वजाति

स्मरणं यस्य स तथा पाठान्तरे संस्माहितपूर्व स वः तथा प्राक्कालापेक्षया द्विगुण
आनीतः संवेगो यस्य स तथा आनंदाश्रुभिः पूर्णे स्तंपुतमित्रायोमुखं यस्य
स तथा हरिसवसत्ति अनेन हरिसवसविसप्पमाणहियए त्ति द्रष्टव्यं धाराहतय
कदंबकं कदंबपुष्पं तद्वत् समुच्छ्रितरोमकूपो रोमांचितइत्यर्थः णिसढेत्ति नि
स्पष्टो दृष्टः अनगारवर्णको वाच्यः सचायं इयासमिए भासासमिए एसणास
मिए आयाणभंडमत्तनिक्खेवणासमिए उच्चारपासवणखेलसिंघाणजल्लपारिठा
वणियासमिए मणसमिए वयसमिए कायसमिए मनोगुप्तेः मनःप्रवृत्तीनां समि
तिः सत्प्रवृत्तिः गुप्तिस्तन्निरोधः अत एव गुत्ते गुत्तिंदिए गुत्तबंभयारी ब्रह्मगु
प्तिभिः चाई संगानां त्यक्ता लज्जू रज्जुरिवावक्रव्यवहारात् लज्जालुर्वा संयमेन लो
किकलज्जया वा तवस्सी खंतिक्खमे क्षांत्या क्षमते यः स तथा जिइंदिए सोधय
त्यात्मपरावितिशोधीता अणिदाणे अप्पुस्सुए अप्रौत्सुक्यो अनुत्सुक
इत्यर्थः अबहिल्लेसे संयमाद्बहिर्भूतचित्तवृत्तिः सुसामण्णरए दंते इणमे

व णिग्गंथं पावयणं पुरओ काउं विहरइ णिग्गंथप्रवचनानुमार्गीत्यर्थः अहासु
त्तं ति यथासूत्रं सूत्रानतिक्रमेण मा प्रतिबंधविधानं विधेहि विवक्षितस्येति
गम्यं भिक्खुपडिमत्ति अभिग्रहविशेषः प्रथमा एकमासिकी एवं द्वितीया
द्याः सप्तमांताः क्रमेण द्वित्रिचतुःपंचषट्सप्तमासमानाः अष्टमीनवमीद
शम्यः प्रत्येकं सप्ताहोरात्रमानाः एकादशी अहोरात्रमाना द्वादशी एकरात्रमा
नेति तत्र पडिवज्जइ एयाउ संघयणधिइजुओ महासत्तो पडिमाउ भावियप्पा
सम्मं गुरुणा अणुन्नाउ गच्छेच्चिय णिम्माउ जा पुव्वा दस भवे असंपुव्वा दस भवे
असंपुण्णे नवमस्स तइयवत्थू होइ जहन्नो सुयाहिगमो वोसट्ठचत्तदेहो उ
वसग्गसहो जहेव जिणकप्पी एसण अभिग्गहीया भत्तं च अलेवडं तस्स
दुट्ठस्स हत्थिमाई तओ भएणं पयंपि णोसरई एवमाइणियमाइणियमसेवी वि
हरइ जा अखंडिओ मासो इत्यादिग्रंथांतरप्रतिहितो विधिरासां द्रष्टव्यः पढमं ए
एकादशांगविदोपि मेघानगारस्य प्रतिमानुष्ठानं भणितं तत्संवेगादिसमुप

ज्ञाताटी॰ दिष्टत्वादनवद्यमवसेयमिति यथासूत्रं सूत्रानतिक्रमेण का कायेन न मनोरथमा
७३ त्रेण फासेइत्ति उचितकाले विधिना ग्रहणात् पालयति असकृदुपयोगेन
प्रतिजागरणात् शोभयति पारणकदिने गुरुदत्तशेषभोजनकरणात् शोध
यति वा अतिचारपंकक्षालनात् तीरयति पूर्णेपि काले स्तोककालमव
स्थानात् कीर्त्तयति पारणकदिने इदं चेदं चैतस्याः कृत्यं कृतमित्येवं
कीर्त्तनात् गुणानां निर्जराविशेषाणां रचनाकरणं संवत्सरेण सत्रिभाग
वर्षेण यस्मिंस्तत्तपो गुणरचनसंवत्सरं गुणा एव वा रत्नानि यत्र स तथा गु
णरत्नः संवत्सरो यत्र तपसि तत् गुणरत्नसंवत्सरमिति इह च त्रयोदश मा
सा: सप्तदशदिनाधिकास्तपःकालस्त्रिसप्ततिश्च दिनानि पारणकका
लइति एवं चायं पणरस वीस चउवीस चेव चउवीस पन्नवीसा य चउवीस ए
कवीसा चउवीसा सत्तवीसा य तीसा तेत्तीसा विय चउवीस छवीस अ
अट्ठवीस बत्तीसा विय सोलसमासेसु तवदिवसा पणरस दस ८ छप्पंच ७३

क्रयति त्तिर्त्तिलेति पंचमकदेयतः सोलसमासेरूपारणगा ७३ इह च यत्र यत्र मा
से अष्टमादितपसो यावंति दिनानि न पूर्यंते तावंत्यग्रेतनमासादाकृष्य पूरणी
पूरणीयान्यधिकानि चाग्रेतनमासे क्षेप्यानीति चउत्थमित्यादि चत्वारि भ
क्तानि यत्र त्यज्यंते तच्चतुर्थमियं चोपवासस्य संज्ञा एवं षष्ठादिरुपवासद्वयादेरि
ति अणिक्खित्तेणं ति अविश्रांतेन दिया ठाणुक्कुडुए णं ति दिवा दिवसे स्थानमासन
मुत्कुटुकं आसने पुतालगनरूपं यस्य स तथा आतापयन् आतापनां कुर्वन् वी
रासणेणं ति सिंहासनोपविष्टस्य भूमिन्यस्तपादस्यापनीते सिंहासनस्येव यदव
स्थानं तद्वीरासनं तेन चावस्थितेन इति गम्यते किंभूतेन अप्रावृतेन अविद्य
मानप्रावरणेन स एव वा अप्रावृतः णंकारस्त्वलंकारार्थः उरालेणमित्यादि
उरालेणं प्रधानेन विपुलेणं बहुदिनत्वाद्विस्तीर्णेन सश्रीकेन शोभनेन पयत्तेणं ति
गुणाप्रयत्नेन प्रयत्नवता वा प्रमादरहितेनेत्यर्थः प्रगृहीतेन बहुमानप्रकर्षाद्गृही
तेन कल्याणेन नीरोगताकारणेन शिवेन शिवहेतुत्वात् धन्येन धनावहत्वात्

मंगल्येन दुरितोपशमसाधकत्वात् उदग्रेणं तीव्रेण उदार्यवता निःस्पृहत्वातिरे
कात् उत्तमेणं ति ऊर्ध्वं तमसोऽज्ञानाद्यत्तत्तथा तेन अज्ञानरहितेनेत्यर्थः
महाणुभागेनाचिंत्यसामर्थ्येन निश्शुभ्रकानीरत्वात् सुक्खा वशेन लुक्खे स्नेहत्वक्का
त् किटिकिटिका ति निर्मांसास्थिसंबंधी उपवेशनादिक्रिया साविशष्ट विशेषः
लों स्नूतः प्राप्तोयः स तथा अस्थिनि चर्मणावनद्धानि यस्य स तथा कृशो दु
र्बलो धमनीसंततः नाडीव्याप्तो जातश्चाप्यभूत् जीवंजीवेणं गच्छइ जीवब
